
श्रीः

श्री वेङ्कटेश

अष्टोत्तर-सहस्रनाम

सुप्रभात, स्तोत्र, प्रपत्ति, मङ्गळाशासन स्तोत्राणि




तिरुमल-तिरुपति देवस्थानम् कमीशनर्
श्री चं. अन्नाराव, बि. ए., महाशयेन
प्रकटीकृतानि

मूल्यम्]   १९६१   [०—१०—०

विषयसूची

श्रीवेङ्कटेश्वर (बालाजी), तिरुपति



।
ठ ॥
पं ।

श्रियः कान्ताय कल्याणनिधये
श्रीवेङ्कटनिवासाय श्रीनिवासा म् ॥
श्रीवेङ्कटाचलाधीशं श्रियाऽध्या
श्रितचेतनमन्दारं श्रीनिवासम

श्रीः

श्री श्रीनिवासपरब्रह्मणे नमः



॥ श्रीवेङ्कटेशसुप्रभातम् ॥

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ १

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥ २

मातस्समस्तजगतां मधुकैटभारेः
वक्षोविहारिणि मनोहरदिव्यरूपे ।
श्रीस्वामिनि श्रितजनप्रियदानशीले
श्रीवेङ्कटेशदयिते तव सुप्रभातम् ॥ ३

तव सुप्रभातमरविन्दलोचने
भवतु प्रसन्नमुखचन्द्रमण्डले ।
विधिशङ्करेन्द्रवनिताभिरर्चिते
वृषशैलनाथदयिते दयानिधे ॥ ४

अत्र्यादिसप्तऋषयस्समुपास्य सन्ध्यां
आकाशसिन्धुकमलानि मनोहराणि ।
आदाय पादयुगमर्चयितुं प्रपन्नाः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ ५

पञ्चाननाब्जभवषण्मुखवासवाद्याः
त्रैविक्रमादिचरितं विबुधाः स्तुवन्ति ।
भाषापतिः पठति वासरशुद्धिमारात्
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ ६

ईषत्प्रफुल्लसरसीरुहनारिकेल-
पूगद्रुमादिसुमनोहरपालिकानाम् ।
आवाति मन्दमनिलस्सह दिव्यगन्धैः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ ७

उन्मील्य नेत्रयुगमुत्तमपञ्जरस्थाः
पात्रावशिष्टकदलीफलपायसानि ।
भुक्त्वा सलीलमथ केलिशुकाः पठन्ति
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ ८

तन्त्रीप्रकर्षमधुरस्वनया विपञ्च्या
गायत्यनन्तचरितं तव नारदोऽपि ।
भाषासमग्रमसकृत्करचाररम्यं
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ ९

भृङ्गावली च मकरन्दरसानुविद्ध
झङ्कारगीतनिनदैः सह सेवनाय ।
निर्यात्युपान्तसरसीकमलोदरेभ्यः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ १०

योषागणेन वरदध्नि विमथ्यमाने
घोषालयेषु दधिमन्थनतीव्रघोषाः ।
रोषात्कलिं विदधते ककुभश्च कुम्भाः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ ११

पद्मेशमित्रशतपत्रगतालिवर्गाः
हर्तुं श्रियं कुवलयस्य निजाङ्गलक्ष्म्या ।
भेरीनिनादमिव बिभ्रति तीव्रनादं
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥ १२

श्रीमन्नभीष्टवरदाखिललोकबन्धो
श्रीश्रीनिवास जगदेकदयैकसिन्धो ।
श्रीदेवतागृहभुजान्तरदिव्यमूर्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥ १३

श्रीस्वामिपुष्करिणिकाऽऽप्लवनिर्मलाङ्गाः
श्रेयोऽर्थिनो हरविरिञ्चिसनन्दनाद्याः ।
द्वारे वसन्ति वरवेत्रहतोत्तमाङ्गाः
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥ १४

श्रीशेषशैलगरुडाचलवेङ्कटाद्रि-
नारायणाद्रिवृषभाद्रिवृषाद्रिमुख्याम् ।
आख्यां त्वदीयवसतेरनिशं वदन्ति
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥ १५

सेवापराः शिवसुरेशकृशानुधर्म-
रक्षोऽम्बुनाथपवमानधनाधिनाथाः ।
बद्धाञ्जलिप्रविलसन्निजशीर्षदेशाः
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥ १६

धाटीषु ते विहगराजमृगाधिराज-
नागाधिराजगजराजहयाधिराजाः ।
स्वस्वाधिकारमहिमाधिकमर्थयन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥ १७

सूर्येन्दुभौमबुधवाक्पतिकाव्यसौरि-
स्वर्भानुकेतुदिविषत्परिषत्प्रधानाः ।
त्वद्दासदासचरमावधिदासदासाः
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥ १८

त्वत्पादधूलिभरितस्फुरितोत्तमाङ्गाः
स्वर्गापवर्गनिरपेक्षनिजान्तरङ्गाः ।
कल्पागमाकलनयाऽऽकुलतां लभन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥ १९

त्वद्गोपुराग्रशिखराणि निरीक्षमाणाः
स्वर्गापवर्गपदवीं परमां श्रयन्तः ।
मर्त्या मनुष्यभुवने मतिमाश्रयन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥ २०

श्रीभूमिनायक दयादिगुणामृताब्धे
देवाधिदेव जगदेकशरण्यमूर्ते ।
श्रीमन्ननन्तगरुडादिभिरर्चिताङ्घ्रे
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥ २१

श्रीपद्मनाभ पुरुषोत्तम वासुदेव
वैकुण्ठ माधव जनार्दन चक्रपाणे ।
श्रीवत्सचिह्न शरणागतपारिजात
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥ २२

कन्दर्पदर्पहरसुन्दरदिव्यमूर्ते
कान्ताकुचाम्बुरुहकुड्मललोलदृष्टे ।
कल्याणनिर्मलगुणाकरदिव्यकीर्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥ २३

मीनाकृते कमठ कोल नृसिंह वर्णिन्
स्वामिन् परश्वथतपोधन रामचन्द्र ।
शेषांशराम यदुनन्दन कल्किरूप
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥ २४

एलालवङ्गघनसारसुगन्धतीर्थं
दिव्यं वियत्सरिति हेमघटेषु पूर्णम्
धृत्वाद्य वैदिकशिखामणयः प्रहृष्टाः
तिष्ठन्ति वेङ्कटपते तव सुप्रभातम् ॥ २५

भास्वानुदेति विकचानि सरोरुहाणि
संपूरयन्ति निनदैः ककुभो विहङ्गाः ।
श्रीवैष्णवाः सततमर्थितमङ्गलास्ते
धामाश्रयन्ति तव वेङ्कट सुप्रभातम् ॥ २६

ब्रह्मादयस्सुरवरास्समहर्षयस्ते
सन्तस्सनन्दनमुखास्त्वथ योगिवर्याः ।
धामान्तिके तव हि मङ्गलवस्तुहस्ताः
श्रीवेङ्कटाचलपते तव सुप्रभातम् २७

लक्ष्मीनिवास निरवद्यगुणैकसिन्धो
संसारसागरसमुत्तरणैकसेतो ।
वेदान्तवेद्यनिजवैभव भक्तभोग्य
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥ २८

इत्थं वृषाचलपतेरिह सुप्रभातम्
ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः ।
तेषां प्रभातसमये स्मृतिरङ्गभाजां
प्रज्ञां परार्थसुलभां परमां प्रसूते ॥ २९

॥ इति श्रीवेङ्कटेशसुप्रभातम्

श्रीः

॥ श्रीवेङ्कटेशस्तोत्रम् ॥

कमलाकुचचूचुककुङ्कुमतो
नियतारुणितातुलनीलतनो ।
कमलायतलोचन लोकपते
विजयीभव वेङ्कटशैलपते ॥ १

सचतुर्मुखषण्मुखपञ्चमुख-
प्रमुखाखिलदैवतमौलिमणे ।
शरणागतवत्सल सारनिधे
परिपालय मां वृषशैलपते ॥ २

अतिवेलतया तव दुर्विषहैः
अनुवेलकृतैरपराधशतैः ।
भरितं त्वरितं वृषशैलपते
परया कृपया परिपाहि हरे ॥ ३

अधिवेङ्कटशैलमुदारमतेः
जनताभिमताधिकदानरतात् ।
परदेवतया गदितान्निगमैः
कमलादयितान्न परं कलये ॥ ४

कलवेणुरवावशगोपवधू
   शतकोटिवृतात्स्मरकोटिसमात् ।
प्रतिवल्लविकाभिमतात्सुखदात्
   वसुदेवसुतान्न परं कलये ॥ ५

अभिरामगुणाकर दाशरथे
   जगदेकधनुर्धर धीरमते ।
रघुनायक राम रमेश विभो
   वरदो भव देव दयाजलधे ॥ ६

अवनीतनयाकमनीयकरं
   रजनीकरचारुमुखाम्बुरुहम् ।
रजनीचरराजतमोमिहिरं
   महनीयमहं रघुराममये ॥ ७

सुमुखं सुहृदं सुलभं सुखदं
   स्वनुजं च सुकायममोघशरम् ।
अपहाय रघूद्वहमन्यमहं
   न कथञ्चन कञ्चन जातु भजे ॥ ८

विना वेङ्कटेशं न नाथो न नाथः
   सदा वेङ्कटेशं स्मरामि स्मरामि ।
हरे वेङ्कटेश प्रसीद प्रसीद
   प्रियं वेङ्कटेश प्रयच्छ प्रयच्छ ॥ ९

श्रीवेङ्कटेशस्तोत्रम्

अहं दूरतस्ते पदाम्भोजयुग्म-
प्रणामेच्छयाऽऽगत्य सेवां करोमि ।
सकृत्सेवया नित्यसेवाफलं त्वं
प्रयच्छ प्रयच्छ प्रभो वेङ्कटेश ॥ १०

अज्ञानिना मया दोषान्
अशेषान्विहितान् हरे ।
क्षमस्व त्वं क्षमस्व त्वं
शेषशैलशिखामणे ॥ ११

॥ इति श्रीवेङ्कटेशस्तोत्रम् ॥

श्री

श्री वेङ्कटेशप्रपत्तिः ॥



ईशानां जगतोऽस्य वेङ्कटपतेर्विष्णोः परां प्रेयसीं
तद्वक्षःस्थलनित्यवासरसिकां तत्क्षान्तिसंवर्धिनीम् ।
पद्मालङ्कृतपाणिपल्लवयुगां पद्मासनस्थां श्रियं
वात्सल्यादिगुणोज्ज्वलां भगवतीं वन्दे जगन्मातरम् ॥ १

श्रीमन् कृपाजलनिधे कृतसर्वलोक
सर्वज्ञ शक्त नतवत्सल सर्वशेषिन् ।
स्वामिन् सुशील सुलभाश्रितपारिजात
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ २

आनूपुरार्पितसुजातसुगन्धिपुष्प-
सौरभ्यसौरभकरौ समसन्निवेशौ ।
सौम्यौ सदाऽनुभवनेऽपि नवानुभाव्यौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ३

सद्योविकासिसमुदित्वरसान्द्रराग-
सौरभ्यनिर्भरसरोरुहसाम्यवार्ताम् ।
सम्यक्षु साहसपदेषु विलेखयन्तौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ४

रेखामयध्वजसुधाकलशातपत्र-
वज्राङ्कुशाम्बुरुहकल्पकशङ्खचक्रैः ।
भव्यैरलङ्कृततलौ परतत्त्वचिह्नैः
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ५

ताम्रोदरद्युतिपराजितपद्मरागौ
बाह्यैर्महोभिरभिभूतमहेन्द्रनीलौ ।
उद्यन्नखांशुभिरुदस्तशशाङ्कभासौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ६

सप्रेमभीति कमलाकरपल्लवाभ्यां
संवाहनेऽपि सपदि क्लममादधानौ ।
कान्ताववाङ्मनसगोचरसौकुमार्यौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ७

लक्ष्मीमहीतदनुरूपनिजानुभाव-
नीलादिदिव्यमहिषीकरपल्लवानाम् ।
आरुण्यसंक्रमणतः किल सान्द्ररागौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ८

नित्यानमद्विधिशिवादिकिरीटकोटि-
प्रत्युप्तदीप्तनवरत्नमहःप्ररोहैः ।
नीराजनाविधिमुदारमुपादधानौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ९

विष्णोः पदे परम इत्युदितप्रशंसौ
यौ मध्व उत्स इति भोग्यतयाऽप्युपात्तौ ।
भूयस्तथेति तव पाणितलप्रदिष्टौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ १०

पार्थाय तत्सदृशसारथिना त्वयैव
यौ दर्शितौ स्वचरणौ शरणं व्रजेति ।
भूयोऽपि मह्यमिह तौ करदर्शितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ ११

मन्मूर्ध्नि कालियफणे विकटाटवीषु
श्रीवेङ्कटाद्रिशिखरे शिरसि श्रुतीनाम् ।
चित्तेऽप्यनन्यमनसां सममाहितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ १२

अम्लानहृष्यदवनीतलकीर्णपुष्पौ
श्रीवेङ्कटाद्रिशिखराभरणायमानौ ।
आनन्दिताखिलमनोनयनौ तवैतौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ १३

प्रायः प्रपन्नजनताप्रथमावगाह्यौ
मातुः स्तनाविव शिशोरमृतायमानौ ।
प्राप्तौ परस्परतुलामतुलान्तरौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ १४

सत्त्वोत्तरैः सततसेव्यपदाम्बुजेन
संसारतारकदयार्द्रदृगञ्चलेन
सौम्योपयन्तृमुनिना मम दर्शितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥ १५

श्रीश श्रिया घटिकया त्वदुपायभावे
प्राप्ये त्वयि स्वयमुपेयतया स्फुरन्त्या ।
नित्याश्रिताय निरवद्यगुणाय तुभ्यं
स्यां किङ्करो वृषगिरीश न जातु मह्यम् ॥ १६

॥ इति श्रीवेङ्कटेशप्रपत्तिः ॥

श्री

॥ श्रीवेङ्कटेशमङ्गलाशासनम् ॥

श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥ १

लक्ष्मीसविभ्रमालोकसुभ्रूविभ्रमचक्षुषे ।
चक्षुषे सर्वलोकानां वेङ्कटेशाय मङ्गलम् ॥ २

श्रीवेङ्कटाद्रिशृङ्गाग्रमङ्गलाभरणाङ्घ्रये ।
मङ्गलानां निवासाय वेङ्कटेशाय मङ्गलम् ॥ ३

सर्वावयवसौन्दर्यसम्पदा सर्वचेतसाम् ।
सदा सम्मोहनायास्तु वेङ्कटेशाय मङ्गलम् ॥ ४

नित्याय निरवद्याय सत्यानन्दचिदात्मने ।
सर्वान्तरात्मने श्रीमद्वेङ्कटेशाय मङ्गलम् ॥ ५

स्वतः सर्वविदे सर्वशक्तये सर्वशेषिणे ।
सुलभाय सुशीलाय वेङ्कटेशाय मङ्गलम् ॥ ६

परस्मै ब्रह्मणे पूर्णकामाय परमात्मने ।
प्रयुञ्जे परतत्त्वाय वेङ्कटेशाय मङ्गलम् ॥ ७

आकालतत्त्वमश्रान्तमात्मनामनुपश्यताम्
अतृप्त्यमृतरूपाय वेङ्कटेशाय मङ्गलम् ॥ ८

प्रायः स्वचरणौ पुंसां शरण्यत्वेन पाणिना ।
कृपयाऽऽदिशते श्रीमद्वेङ्कटेशाय मङ्गलम् ॥ ९

दयामृततरङ्गिण्यास्तरङ्गैरिव शीतलैः ।
अपाङ्गैः सिञ्चते विश्वं वेङ्कटेशाय मङ्गलम् ॥ १०

स्रग्भूषाम्बरहेतीनां सुषमावहमूर्तये ।
सर्वार्तिशमनायास्तु वेङ्कटेशाय मङ्गलम् ॥ ११

श्रीवैकुण्ठविरक्ताय स्वामिपुष्करिणीतटे ।
रमया रममाणाय वेङ्कटेशाय मङ्गलम् ॥ १२

श्रीमत्सुन्दरजामातृमुनिमानसवासिने ।
सर्वलोकनिवासाय श्रीनिवासाय मङ्गलम् ॥ १३

मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः ।
सर्वैश्च पूर्वैराचार्यैस्सत्कृतायास्तु मङ्गलम् ॥ १४

॥ इति श्रीवेङ्कटेशमङ्गलाशासनम् ॥

श्रीरस्तु

श्री श्रीनिवासपरब्रह्मणे नमः

॥ श्रियै श्रीपद्मावत्यै नमः ॥

॥ श्रीमते विष्वक्सेनाय नमः ॥

॥ श्रीवेङ्कटेशाष्टोत्तरशतनामस्तोत्रम्

श्रियःकान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥

श्रीवेङ्कटाचलाधीशं श्रियाऽध्यासितवक्षसम् ।
श्रितचेतनमन्दारं श्रीनिवासमहं भजे ॥

मुनयः सूत सर्वार्थतत्त्वज्ञ सर्ववेदान्तपारग ।
येन चाराधितः सद्यः श्रीमद्वेङ्कटनायकः ॥ १

भवत्यभीष्टसर्वार्थप्रदस्तद् ब्रूहि नो मुने ।
इति पृष्टस्तदा सूतो ध्यात्वा स्वात्मनि तत्क्षणात् ॥ २

उवाच - मुनिशार्दूलाः श्रूयतामिति वै मुनिः ।
श्रीसूतः- अस्ति किञ्चिन्महद्गोप्यं भगवत्प्रीतिकारकम् ॥ ३

पुरा शेषेण कथितं कपिलाय महात्मने ।
नाम्नामष्टशतं पुण्यं पवित्रं पापनाशनम् ॥ ४

आदाय हेमपद्मानि स्वर्णदीसंभवानि च ।
ब्रह्मा तु पूर्वमभ्यर्च्य श्रीमद्वेङ्कटनायकम् ॥ ५

अष्टोत्तरशतैर्दिव्यैः नामभिर्मुनिपूजितैः ।
स्वाभीष्टं लब्धवान् ब्रह्मा सर्वलोकपितामहः ॥ ६

भवद्भिरपि पद्मैश्च समर्च्यस्तैश्च नामभिः ।
तेषां शेषनगाधीशमानसोल्लासकारिणाम् ॥ ७

नाम्नामष्टशतं वक्ष्ये वेङ्कटाद्रिनिवासिनः ।
आयुरारोग्यदं पुंसां धनधान्यसुखप्रदम् ॥ ८

ज्ञानप्रदं विशेषेण महदैश्वर्यकारकम् ।
अर्चयेन्नामभिर्दिव्यैः वेङ्कटेशपदाङ्कितैः ॥ ९

नाम्नामष्टशतस्यास्य ऋषिर्ब्रह्मा प्रकीर्तितः ।
छन्दोऽनुष्टुप्तथा देवो वेङ्कटेश उदाहृतः ॥ १०

नीलगोक्षीरसंभूतो बीजमित्युच्यते बुधैः ।
श्रीनिवासस्तथा शक्तिर्हृदयं वेङ्कटाधिपः ॥ ११

विनियोगस्तथाऽभीष्टसिद्ध्यर्थे च निगद्यते ।
ओं नमो वेङ्कटेशाय शेषाद्रिनिलयाय च ॥ १२

वृषदृग्गोचरायाथ विष्णवे सततं नमः ।
सदञ्जनगिरीशाय वृषाद्रिपतये नमः ॥ १३

मेरुपुत्रगिरीशाय सर स्वामितटीजुषे ।
कुमाराकल्पसेव्याय वज्रिदृग्विषयाय च ॥ १४

सुवर्चलासुतन्यस्तसैनापत्यभराय च ।
रामाय पद्मनाभाय सदा वायुस्तुताय च ॥ १५

त्यक्तवैकुण्ठलोकाय गिरिकुञ्जविहारिणे ।
हरिचन्दनगोत्रेन्द्रस्वामिने सततं नमः ॥ १६

शङ्खराजन्यनेत्राब्जविषयाय नमो नमः ।
वसूपरिचरत्रात्रे कृष्णाय सततं नमः ॥ १७

अब्धिकन्यापरिष्वक्तवक्षसे वेङ्कटाय च ।
सनकादिमहायोगिपूजिताय नमो नमः ॥ १८

देवजित्प्रमुखानन्तदैत्यसङ्घप्रणाशिने ।
श्वेतद्वीपवसन्मुक्तपूजिताङ्घ्रियुगाय च ॥ १९

शेषपर्वतरूपत्वप्रकाशनपराय च ।
सानुस्थापिततार्क्ष्याय तार्क्ष्याचलनिवासिने ॥ २०

मायागूढविमानाय गरुडस्कन्धवासिने ।
अनन्तशिरसे नित्यमनन्ताक्षाय ते नमः ॥ २१

अनन्तचरणायाथ श्रीशैलनिलयाय च ।
दामोदराय ये नित्यं नीलमेघनिभाय च ॥ २२

ब्रह्मादिदेवदुर्दर्शविश्वरूपाय ते नमः ।
वैकुण्ठागतसद्धेमविमानान्तर्गताय च ॥ २३

अगस्त्याभ्यर्थिताशेषजनदृग्गोचराय च ।
वासुदेवाय हरये तीर्थपञ्चकवासिने ॥ २४

वामदेवप्रियायाथ जनकेष्टप्रदाय च ।
मार्कण्डेयमहातीर्थजातपुण्यप्रदाय च ॥ २५

वाक्पतिब्रह्मदात्रे च चन्द्रलावण्यदायिने ।
नारायणनगेशाय ब्रह्मक्लृप्तोत्सवाय च ॥ २६

शङ्खचक्रवरानम्रलसत्करतलाय च ।
द्रवन्मृगमदासक्तविग्रहाय नमो नमः ॥ २७

केशवाय नमो नित्यं नित्ययौवनमूर्तये ।
अर्थितार्थप्रदात्रे च विश्वतीर्थाघहारिणे ॥ २८

तीर्थस्वामिसरःस्नातजनाभीष्टप्रदायिने ।
कुमारधारिकावासस्कन्दाभीष्टप्रदाय च ॥ २९

जानुदघ्नसमुद्भूतपोत्रिणे कूर्ममूर्तये ।
किन्नरद्वन्द्वशापान्तप्रदात्रे विभवे नमः ॥ ३०

वैखानसमुनिश्रेष्ठपूजिताय नमो नमः ।
सिंहाचलनिवासाय श्रीमन्नारायणाय च ॥ ३१

सद्भक्तनीलकण्ठार्च्य नृसिंहाय नमो नमः ।
कुमुदाक्षगणश्रेष्ठसैनापत्यप्रदाय च ॥ ३२

दुर्मेधःप्राणहर्त्रे च श्रीधराय नमो नमः ।
क्षत्रियान्तकरामाय मत्स्यरूपाय ते नमः ॥ ३३

पाण्डवारिप्रहर्त्रे च श्रीकराय नमो नमः ।
उपत्यकाप्रदेशस्थशङ्करध्यानमूर्तये ॥ ३४

रुक्माब्जसरसीकूललक्ष्मीकृततपस्विने ।
लसल्लक्ष्मीकराम्भोजदत्तकल्हारकस्रजे ॥ ३५

शालग्रामनिवासाय शुकदृग्गोचराय च ।
नारायणार्थिताशेषजनदृग्विषयाय च ॥ ३६

मृगयारसिकायाथ वृषभासुरहारिणे ।
अञ्जनागोत्रपतये वृषभाचलवासिने ॥ ३७

अञ्जनासुतदात्रे च माधवीयाघहारिणे ।
प्रियङ्गुप्रियभक्षाय श्वेतकोलवराय च ॥ ३८

नीलधेनुपयोधारासेकदेहोद्भवाय च ।
शङ्करप्रियमित्राय चोलपुत्रप्रियाय च ॥ ३९

सुधर्मिणीसुचैतन्यप्रदात्रे मधुघातिने ।
कृष्णाख्यविप्रवेदान्तदेशिकत्वप्रदाय च ॥ ४०

वराहाचलनाथाय बलभद्राय ते नमः ।
त्रिविक्रमाय महते हृषीकेशाय ते नमः ॥ ४१

अच्युताय नमो नित्यं नीलाद्रिनिलयाय च ।
नमः क्षीराब्धिनाथाय वैकुण्ठाचलवासिने ॥ ४२

मुकुन्दाय नमो नित्यमनन्ताय नमो नमः ।
विरिञ्च्याभ्यर्थितानीतसौम्यरूपाय ते नमः ॥ ४३

सुवर्णमुखरीस्नानमनुजाभीष्टदायिने ।
हलायुधजगत्तीर्थसमस्तफलदायिने ॥ ४४

गोविन्दाय नमो नित्यं श्रीनिवासाय ते नमः ।
अष्टोत्तरशतं नाम्नां चतुर्थ्या नमसाऽन्वितम् ॥ ४५

यः पठेच्छृणुयान्नित्यं श्रद्धाभक्तिसमन्वितः ।
तस्य श्रीवेङ्कटेशस्तु प्रसन्नो भवति ध्रुवम् ॥ ४६

अर्चनायां विशेषेण ग्राह्यमष्टोत्तरं शतम् ।
वेङ्कटेशाभिधेयैर्यो वेङ्कटाद्रिनिवासिनम् ॥ ४७

अर्चयेन्नामभिस्तस्य फलं मुक्तिर्न संशयः ।
गोपनीयमिदं स्तोत्रं सर्वेषां न प्रकाशयेत् ॥ ४८

श्रद्धाभक्तियुजामेव दापयेन्नामसङ्ग्रहम् ।
इति शेषेण कथितं कपिलाय महात्मने ॥ ४९

कपिलाख्यमहायोगिसकाशात्तु मया श्रुतम् ।
तदुक्तं भवतामद्य सद्यः प्रीतिकरं हरेः ॥ ५०

इति श्रीवराहपुराणान्तर्गते श्रीवेङ्कटाचलमाहात्म्ये
श्रीवेङ्कटेशाष्टोत्तरशतनामकीर्तनं
नामैकषष्टितमोऽध्यायः

श्री

श्री श्रीनिवासपरब्रह्मणे नम

॥ श्रीवेङ्कटेशाष्टोत्तरशतनामावलिः ॥

ॐ वेङ्कटेशाय	श्रीवेङ्कटेशाय नमः
,, शेषाद्रिनिलयाय	,,
,, वृषद्दृग्गोचराय	,,
,, विष्णवे	,,
,, सदञ्जनगिरीशाय	,,
,, वृषाद्रिपतये	,,
,, मेरुपुत्रगिरीशाय	,,
,, सरस्स्वामितटीजुषे	,,
,, कुमाराकल्पसेव्याय	,,
,, वज्रिदृग्विषयाय	,, १०
,, सुवर्चलासुतन्यस्तसेनापत्यभराय	,,
,, रामाय	,,
,, पद्मनाभाय	,,
,, सदावायुस्तुताय	,,
,, त्यक्तवैकुण्ठलोकाय	,,
,, गिरिकुञ्जविहारिणे	,,

ॐ हरिचन्दनगोत्रेन्द्रस्वामिने	श्रीवेङ्कटेशाय नमः	
,, शङ्खराजन्यनेत्राब्जविषयाय	,,	
,, वसूपरिचरत्रात्रे	,,	
,, कृष्णाय	,,	२०
,, अब्धिकन्यापरिष्वक्तवक्षसे	,,	
,, वेङ्कटाय	,,	
,, सनकादिमहायोगिपूजिताय	,,	
,, देवजित्प्रमुखानन्तदैत्यसङ्घप्रणाशिने	,,	
,, श्वेतद्वीपवसन्मुक्तपूजिताङ्घ्रियुगाय	,,	
,, शेषपर्वतरूपत्वप्रकाशनपराय	,,	
,, सानुस्थापिततार्क्ष्याय	,,	
,, तार्क्ष्याचलनिवासिने	,,	
,, मायागूढविमानाय	,,	
,, गरुडस्कन्धवासिने	,,	३०
,, अनन्तशिरसे	,,	
,, अनन्ताक्षाय	,,	
,, अनन्तचरणाय	,,	
,, श्रीशैलनिलयाय	,,	
,, दामोदराय	,,	
,, नीलमेघनिभाय	,,	
,, ब्रह्मादिदेवदुर्दर्शविश्वरूपाय	,,	
,, वैकुण्ठागतसद्धेमविमानान्तर्गताय	,,	

ॐ अगस्त्याभ्यर्थिताशेषजनदृग्गोचराय श्रीवेङ्कटेशाय नमः

,, वासुदेवाय ,, ४०

,, हरये ,,

,, तीर्थपञ्चकवासिने ,,

,, वामदेवप्रियाय ,,

,, जनकेष्टप्रदाय ,,

,, मार्कण्डेयमहातीर्थजातपुण्यप्रदाय ,,

,, वाक्पतिब्रह्मदात्रे ,,

,, चन्द्रलावण्यदायिने ,,

,, नारायणनगेशाय ,,

,, ब्रह्मक्लृप्तोत्सवाय ,,

,, शङ्खचक्रवरानम्रलसत्कराय ,, ५०

,, द्रवन्मृगमदासक्तविग्रहाय ,,

,, केशवाय ,,

,, नित्ययौवनमूर्तये ,,

,, अर्थितार्थप्रदात्रे ,,

,, विश्वतीर्थाघहारिणे ,,

,, तीर्थस्वामिसरस्स्नातजनाभीष्टप्रदायिने ,,

,, कुमारधारिकावासस्कन्दाभीष्टप्रदाय ,,

,, जानुदघ्नसमुद्भूतपोत्रिणे ,,

,, कूर्ममूर्तये ,,

,, किन्नरद्वन्द्वशापान्तप्रदात्रे ,, ६०

ॐ विभवे	श्रीवेङ्कटेशाय नमः	
,, वैखानसमुनिश्रेष्ठपूजिताय	,,	
,, सिंहाचलनिवासाय	,,	
,, श्रीमन्नारायणाय	,,	
,, सद्भक्तनीलकण्ठार्च्यनृसिंहाय	,,	
,, कुमुदाक्षगणश्रेष्ठसैनापत्यप्रदाय	,,	
,, दुर्मेधःप्राणहर्त्रे	,,	
,, श्रीधराय	,,	
,, क्षत्रियान्तकरामाय	,,	
,, मत्स्यरूपाय	,,	७०
,, पाण्डवारिप्रहर्त्रे	,,	
,, श्रीकराय	,,	
,, उपत्यकाप्रदेशस्थशङ्करध्यातमूर्तये		
,, रुक्माब्जसरसीकूललक्ष्मीकृततपस्विने	,,	
,, लसल्लक्ष्मीकराम्भोजदत्तकह्लारकस्रजे	,,	
,, शालग्रामनिवासाय	,,	
,, शुकदृग्गोचराय	,,	
,, नारायणार्थिताशेषजनदृग्विषयाय	,,	
,, मृगयारसिकाय	,,	
,, वृषभासुरहारिणे	,,	८०
,, अञ्जनागोत्रपतये	,,	
,, वृषभाचलवासिने	,,	

ॐ अज्ञानामृतदात्रे	श्रीवेङ्कटेशाय नमः	
„ माधवीयाघहारिणे	„	
„ प्रियङ्गुप्रियभक्षाय	„	
„ श्वेतकोलवराय	„	
„ नीलधेनुपयोधारासेकदेहोद्भवाय	„	
„ शङ्करप्रियमित्राय	„	
„ चोलपुत्रप्रियाय	„	
„ सुधर्मिणीसुचैतन्यप्रदात्रे	„	९०
„ मधुघातिने	„	
„ कृष्णाख्यविप्रवेदान्तदेशिकत्वप्रदाय	„	
„ वराहाचलनाथाय	„	
„ बलभद्राय	„	
„ त्रिविक्रमाय	„	
„ महते	„	
„ हृषीकेशाय	„	
„ अच्युताय	„	
„ नीलाद्रिनिलयाय	„	
„ क्षीराब्धिनाथाय	„	१००
„ वैकुण्ठाचलवासिने	„	
„ मुकुन्दाय	„	
„ अनन्ताय	„	
„ विरिञ्चाभ्यर्थितानीतसौम्यरूपाय	„	

ॐ सुवर्णमुखरीस्नानमनुजाभीष्टदायिने श्रीवेङ्कटेशाय नमः

,, हलायुधजगत्तीर्थसमस्तफलदायिने ,,

,, गोविन्दाय ,,

,, श्रीनिवासाय ,, १०८

॥ इति श्रीवेङ्कटेशाष्टोत्तरशतनामावलिः सम्पूर्णा ॥

श्रीरस्तु

श्री श्रीनिवासपरब्रह्मणे नमः

॥ श्रियै पद्मावत्यै नमः ॥

॥ श्रीवेङ्कटेशसहस्रनामस्तोत्रम् ॥

श्रीवसिष्ठ उवाच —

भगवन् केन विधिना नामभिर्वेङ्कटेश्वरम् ।
पूजयामास तं देवं ब्रह्मा तु कमलैः शुभैः ॥ १

पृच्छामि तानि नामानि गुणयोगपराणि किम् ।
मुख्यवृत्तीनि किं ब्रूहि लक्षकाण्यथवा हरेः ॥ २

नारद उवाच —

नामान्यनन्तानि हरेः गुणयोगानि कानि चित् ।
मुख्यवृत्तीनि चान्यानि लक्षकाण्यपराणि च ॥ ३

परमार्थैः सर्वशब्दैरेको ज्ञेयः परः पुमान् ।
आदिमध्यान्तरहितस्त्वव्यक्तोऽनन्तरूपभृत् ॥ ४

चन्द्रार्कवह्निवाय्वाद्या ग्रहर्क्षाणि नभो दिशः ।
अन्वयव्यतिरेकाभ्यां सन्ति नो सन्ति यन्मते ॥ ५

तस्य देवस्य नाम्नां हि पारं गन्तुं हि कः क्षमः ।
तथाऽपि चाभिधानानि वेङ्कटेशस्य कानिचित् ॥ ६

ब्रह्मर्गीतानि पुण्यानि तानि वक्ष्यामि सुव्रत ।
यदुच्चारणमात्रेण विमुक्ताघः परं व्रजेत् ॥ ७

वेङ्कटेशस्य नाम्नां हि सहस्रस्य ऋषिर्विधिः ।
छन्दोऽनुष्टुप् तथा देवः श्रीवत्साङ्को रमापतिः ॥ ८

बीजभूतस्तथोङ्कारो ह्रीं क्लीं शक्तिश्च कीलकम् ।
ॐ नमो वेङ्कटेशायेत्यादिर्मन्त्रोऽत्र कथ्यते ॥ ९

ब्रह्माण्डगर्भः कवचमस्त्रं चक्रगदाधरः ।
विनियोगोऽभीष्टसिद्धौ हृदयं सामगायनः ॥

भास्वच्चन्द्रमसौ यदीयनयने भार्या यदीया रमा
यस्माद्विश्वसृडप्यभूद्यमकुलं यद्ध्यानयुक्तं सदा ।
नाथो यो जगतां नगेन्द्रदुहितुर्नाथोऽपि यद्भक्तिमान्
तातो यो मदनस्य यो दुरितहा तं वेङ्कटेशं भजे ॥

ऊर्ध्वौ हस्तौ यदीयौ सुरिपुदलने बिभ्रतौ शङ्खचक्रे
सेव्यावङ्घ्री स्वकीयावभिदधदधरो दक्षिणो यस्य पाणिः ।
तावन्मात्रं भवाब्धिं गमयति भजतामूरुगो वामपाणिः
श्रीवत्साङ्कश्च लक्ष्मीर्यदुरसि लसतस्तं भजे वेङ्कटेशम् ॥

इति ध्यायन् वेङ्कटेशं श्रीवत्साङ्कं रमापतिम् ।
वेङ्कटेशो विरूपाक्ष इत्यारभ्य जपेत्क्रमात् ॥ १०

वेङ्कटेशो विरूपाक्षो विश्वेशो विश्वभावनः ।
विश्वसृड्विश्वसंहर्ता विश्वप्राणो विराड्वपुः ॥ ११

शेषाद्रिनिलयोऽशेषभक्तदुःखप्रणाशनः ।
शेषस्तुत्यः शेषशायी विशेषज्ञो विभुः स्वभूः ॥ १२

विष्णुर्जिष्णुश्च वर्धिष्णुरुत्सविष्णुः सहिष्णुकः ।
भ्राजिष्णुश्च ग्रसिष्णुश्च वर्तिष्णुश्च भरिष्णुकः ॥ १३

कालयन्ता कालगोप्ता कालः कालान्तकोऽखिलः ।
कालगम्यः कालकण्ठवन्द्यः कालकलेश्वरः ॥ १४

शम्भुः स्वयम्भुरम्भोजनाभिस्स्तम्भितवारिधिः ।
अम्भोधिनन्दिनीजानिः शोणाम्भोजपदप्रभः ॥ १५

कम्बुग्रीवः शम्बरारिरूपः शम्बरजेक्षणः ।
बिम्बाधरो बिम्बरूपी प्रतिबिम्बक्रियातिगः ॥ १६

गुणवान् गुणगम्यश्च गुणातीतो गुणप्रियः ।
दुर्गुणध्वंसकृत्सर्वसुगुणो गुणभासकः ॥ १७

परेशः परमात्मा च परञ्ज्योतिः परा गतिः ।
परं पदं वियद्वासाः पारम्पर्यशुभप्रदः ॥ १८

ब्रह्माण्डगर्भो ब्रह्मण्यो ब्रह्मसृड्ब्रह्मबोधितः ।
ब्रह्मस्तुत्यो ब्रह्मवादी ब्रह्मचर्यपरायणः ॥ १९

सत्यव्रतार्थसन्तुष्टस्सत्यरूपी झषाङ्गवान् ।
सोमकप्राणहारी चानीताम्नायोऽब्धिसञ्चरः ॥ २०

देवासुरवरस्तुत्यः पतन्मन्दरधारकः ।
धन्वन्तरिः कच्छपाङ्गः पयोनिधिविमन्थकः ॥ २१

अमरामृतसन्धाता धृतसम्मोहिनीवपुः ।
हरमोहकमायावी रक्षस्सन्दोहभञ्जनः ॥ २२

हिरण्याक्षविदारी च यज्ञो यज्ञविभावनः ।
यज्ञीयोर्वीसमुद्धर्ता लीलाक्रोडः प्रतापवान् ॥ २३

दण्डकासुरविध्वंसी वक्रदंष्ट्रः क्षमाधरः ।
गन्धर्वशापहरणः पुण्यगन्धो विचक्षणः ॥ २४

करालवक्त्रः सोमार्कनेत्रः षड्गुणवैभवः ।
श्वेतघोणी घूर्णितभ्रूर्घुर्घुरध्वनिविभ्रमः ॥ २५

द्राघीयान् नीलकेशी च जाग्रदम्बुजलोचनः ।
घृणावान् घृणिसम्मोहो महाकालाग्निदीधितिः ॥ २६

ज्वालाकरालवदनो महोल्काकुलवीक्षणः ।
सटानिर्भिण्णमेघौघो दंष्ट्रारुग्व्याप्तदिक्तटः ॥ २७

उच्छ्वासाकृष्टभूतेशो निश्श्वासत्यक्तविश्वसृट् ।
अन्तर्भ्रमज्जगद्गर्भोऽनन्तो ब्रह्मकपालहृत् ॥ २८

उग्रो वीरो महाविष्णुर्ज्वलनः सर्वतोमुखः ।
नृसिंहो भीषणो भद्रो मृत्युमृत्युः सनातनः ॥ २९

सभास्तम्भोद्भवो भीमः शिरोमाली महेश्वरः ।
द्वादशादित्यचूडालः कल्पधूमसटाच्छविः ॥ ३०

हिरण्यकोरःस्थलभिन्नखः सिंहमुखोऽनघः ।
प्रह्लादवरदो धीमान् भक्तसङ्घप्रतिष्ठितः ॥ ३१

ब्रह्मरुद्रादिसंसेव्यः सिद्धसाध्यप्रपूजितः ।
लक्ष्मीनृसिंहो देवेशो ज्वालाजिह्वान्त्रमालिकः ॥ ३२

खड्गी खेटी महेष्वासी कपाली मुसली हली ।
पाशी शूली महाबाहुर्ज्वरघ्नो रोगलुण्ठकः ॥ ३३

मौञ्जीयुक् छात्रको दण्डी कृष्णाजिनधरो वटुः ।
अधीतवेदो वेदान्तोद्धारको ब्रह्मनैष्ठिकः ॥ ३४

अहीनशयनप्रीतः आदितेयोऽनघो हरिः ।
संवित्प्रियस्सामवेद्यो बलिवेश्मप्रतिष्ठितः ॥ ३५

बलिक्षालितपादाब्जो विन्ध्यावलिविमानितः ।
त्रिपादभूमिस्वीकर्ता विश्वरूपप्रदर्शकः ॥ ३६

धृतत्रिविक्रमः साङ्घ्रिनखभिन्नाण्डखर्परः ।
पज्जातवाहिनीधारापवित्रितजगत्त्रयः ॥ ३७

विधिसम्मानितः पुण्यो दैत्ययोद्धा जयोर्जितः ।
सुरराज्यप्रदः शुक्रमदहृत् सुगतीश्वरः ॥ ३८

जामदग्न्यः कुठारी च कार्तवीर्यविदारणः ।
रेणुकायाश्शिरोहारी दुष्टक्षत्रियमर्दनः ॥ ३९

वर्चस्वी दानशीलश्च धनुष्मान् ब्रह्मवित्तमः ।
अत्युदग्रः समग्रश्च न्यग्रोधो दुष्टनिग्रहः ॥ ४०

रविवंशसमुद्भूतो राघवो भरताग्रजः ।
कौसल्यातनयो रामो विश्वामित्रप्रियङ्करः ॥ ४१

ताटकारिः सुबाहुघ्नो बलातिबलमन्त्रवान् ।
अहल्याशापविच्छेदी प्रविष्टजनकालयः ॥ ४२

स्वयंवरसभासंस्थ ईशचापप्रभञ्जनः ।
जानकीपरिणेता च जनकाधीशसंस्तुतः ॥ ४३

जमदग्नितनूजातयोद्धाऽयोध्याधिपाग्रणीः ।
पितृवाक्यप्रतीपालस्त्यक्तराज्यः सलक्ष्मणः ॥ ४४

ससीतश्चित्रकूटस्थो भरताहितराज्यकः ।
काकदर्पप्रहर्ता च दण्डकारण्यवासकः ॥ ४५

पञ्चवट्यां विहारी च स्वधर्मपरिपोषकः ।
विराधहाऽगस्त्यमुख्यमुनिसम्मानितः पुमान् ॥ ४६

इन्द्रचापधरः खड्गधरश्चाक्षयसायकः ।
खरान्तको दूषणारिस्त्रिशिरस्कारिपुर्वृषः ॥ ४७

ततः शूर्पणखानासाच्छेत्ता वल्कलधारकः ।
जटावान् पर्णशालास्थो मारीचबलमर्दकः ॥ ४८

पक्षिराट्कृतसंवादो रवितेजा महाबलः ।
शबर्यानीतफलभुग्घनुमत्परितोषितः ॥ ४९

सुग्रीवाभयदो दैत्यकायक्षेपणभासुरः ।
सप्ततालसमुच्छेत्ता वालिहृत्कपिसंवृतः ॥ ५०

वायुसूनुकृतासेवस्त्यक्तपम्पः कुशासनः ।
उदन्वत्तीरगः शूरो विभीषणवरप्रदः ॥ ५१

सेतुकृद्दैत्यहा प्राप्तलङ्कोऽलङ्कारवान् स्वयम् ।
अतिकायशिरश्छेत्ता कुम्भकर्णविभेदनः ॥ ५२

दशकण्ठशिरोध्वंसी जाम्बवत्प्रमुखावृतः ।
जानकीशः सुराध्यक्षः साकेतेशः पुरातनः ॥ ५३

पुण्यश्लोको वेदवेद्यः स्वामितीर्थनिवासकः ।
लक्ष्मीसरःकेलिलोलो लक्ष्मीशो लोकरक्षकः ॥ ५४

देवकीगर्भसम्भूतो यशोदेक्षणलालितः ।
वसुदेवकृतस्तोत्रो नन्दगोपमनोहरः ॥ ५५

चतुर्भुजः कोमलाङ्गो गदावानीलकुन्तलः ।
पूतनाप्राणसंहर्ता तृणावर्तविनाशनः ॥ ५६

गर्गारोपितनामाङ्को वासुदेवो ह्यधोक्षजः ।
गोपिकास्तन्यपायी च बलभद्रानुजोऽच्युतः ॥ ५७

वैयाघ्रनखभूषश्च वत्सजिद्वत्सवर्धनः ।
क्षीरसारशनरतो दधिभाण्डप्रमर्दनः ॥ ५८

नवनीतापहर्ता च नीलनीरदभासुरः ।
आभीरदृष्टदौर्जन्यो नीलपद्मनिभाननः ॥ ५९

मातृदर्शितविश्वास्य उलूखलनिबन्धनः ।
नलकूबरशापान्तो गोधूलिच्छुरिताङ्गकः ॥ ६०

गोसङ्घरक्षकः श्रीशो बृन्दारण्यनिवासकः ।
वत्सान्तको बकद्वेषी दैत्याम्बुदमहानिलः ॥ ६१

महाजगरचण्डाग्निः शकटप्राणकण्टकः ।
इन्द्रसेव्यः पुण्यगात्रः खरजिच्चण्डदीधितिः ॥ ६२

तालपक्वफलाशी च कालीयफणिदर्पहा ।
नागपत्नीस्तुतिप्रीतः प्रलम्बासुरखण्डनः ॥ ६३

दावाग्निबलसंहारी फलाहारी गदाग्रजः ।
गोपाङ्गनाचेलचोरः पाथोलीलाविशारदः ॥ ६४

वंशगानप्रवीणश्च गोपीहस्ताम्बुजार्चितः ।
मुनिपत्न्याहृताहारो मुनिश्रेष्ठो मुनिप्रियः ॥ ६५

गोवर्द्धनाद्रिसन्धर्ता सङ्क्रन्दनतमोऽपहः ।
सदुद्यानविलासी च रासक्रीडापरायणः ॥ ६६

वरुणाभ्यर्चितो गोपीप्रार्थितः पुरुषोत्तमः ।
अक्रूरस्तुतिसम्प्रीतः कुब्जायौवनदायकः ॥ ६७

मुष्टिकोरःप्रहारी च चाणूरोदरदारणः ।
मल्लयुद्धाग्रगण्यश्च पितृबन्धनमोचकः ॥ ६८

मत्तमातङ्गपञ्चास्यः कंसग्रीवानिकृन्तनः ।
उग्रसेनप्रतिष्ठाता रत्नसिंहासनस्थितः ॥ ६९

कालनेमिखलद्वेषी मुचुकुन्दवरप्रदः ।
साल्वसेवितदुर्धर्षराजस्मयनिवारणः ॥ ७०

रुक्मिगर्वापहारी च रुक्मिणीनयनोत्सवः ।
प्रद्युम्नजनकः कामी प्रद्युम्नो द्वारकाधिपः ॥ ७१

मण्याहर्ता महामायो जाम्बवत्कृतसङ्गरः ।
जाम्बूनदाम्बरधरो गम्यो जाम्बवतीविभुः ॥ ७२

कालिन्दीप्रथितारामकेलिर्गुञ्जावतंसकः ।
मन्दारसुमनोभास्वान् शचीशाभीष्टदायकः ॥ ७३

सत्राजिन्मानमोक्तासी सत्याजानिः शुभावहः ।
शतधन्वहरः सिद्धः पाण्डवप्रियकोत्सवः ॥ ७४

भद्रप्रियः सुभद्राया भ्राता नाग्नाजितीविभुः ।
किरीटकुण्डलधरः कल्पपल्लवलालितः ॥ ७५

भैष्मीप्रणयभाषावान् मित्रविन्दाधिपोऽभयः ।
स्वमूर्तिकेलिसम्प्रीतो लक्ष्मणोदारमानसः ॥ ७६

प्राग्ज्योतिषाधिपध्वंसी तत्सैन्यान्तकरोऽमृतः ।
भूमिस्तुतो भूरिभोगी भूषणाम्बरसंयुतः ॥ ७७

बहुरामाकृताह्लादो गन्धमाल्यानुलेपनः ।
नारदादृष्टचरितो देवेशो विश्वराड् गुरुः ॥ ७८

बाणबाहुविदारश्च तापज्वरविनाशकः ।
उषोद्धर्षयिताऽव्यक्तः शिववाक्तुष्टमानसः ॥ ७९

महेशज्वरसंस्तुत्यः शीतज्वरभयान्तकः ।
नृगराजोद्धारकश्च पौण्ड्रकादिवधोद्यतः ॥ ८०

विविधारिच्छलोद्विग्नब्राह्मणेषु दयापरः ।
जरासन्धबलद्वेषी केशिदैत्यभयङ्करः ॥ ८१

चक्री चैद्यान्तकः सभ्यो राजबन्धविमोचकः ।
राजसूयहविर्भोक्ता स्निग्धाङ्गः शुभलक्षणः ॥ ८२

धान्यभक्षणसंप्रीत कुचेलाभीष्टदायक ।
सत्त्वादिगुणगम्भीरो द्रौपदीमानरक्षक ॥ ८३

भीष्मध्येयो भक्तवश्यो भीमपूज्यो दयानिधि ।
दन्तवक्त्रशिरश्छेत्ता कृष्णः कृष्णासख स्वराट् ॥ ८४

वैजयन्तीप्रमोदी च बर्हिबर्हविभूषण ।
पार्थकौरवसन्धानकारी दुःशासनान्तक ॥ ८५

बुद्धो विशुद्ध सर्वज्ञ क्रतुहिंसाविनिन्दकः ।
त्रिपुरस्त्रीमानभङ्ग सर्वशास्त्रविशारद ॥ ८६

निर्विकारो निर्ममश्च निराभासो निरामय ।
जगन्मोहकधर्मी च दिग्वस्त्रो दिक्पतीश्वर ॥ ८७

कल्की म्लेच्छप्रहर्ता च दुष्टनिग्रहकारक ।
धर्मप्रतिष्ठाकारी च चातुर्वर्ण्यविभागकृत् ॥ ८८

युगान्तको युगाक्रान्तो युगकृद्युगभासक ।
कामारि कामकारी च निष्काम कामितार्थद ॥ ८९

भर्गो वरेण्य सवितु शार्ङ्गी वैकुण्ठमन्दिर ।
हयग्रीव कैटभारि ग्राहघ्नो गजरक्षक ॥ ९०

सर्वसंशयविच्छेत्ता सर्वभक्तसमुत्सुकः ।
कपर्दी कामहारी च कला काष्ठा स्मृतिर्धृति ॥ ९१

अनादिरप्रमेयौजाः प्रधानः सन्निरूपकः ।
निर्लेपो निःस्पृहोऽसङ्गो निर्भयो नीतिपारगः ॥ ९२

निष्प्रेष्यो निष्क्रियः शान्तो निष्प्रपञ्चो निधिर्नयः ।
कर्म्यकर्मी विकर्मी च कर्मेप्सुः कर्मभावनः ॥ ९३

कर्माङ्गः कर्मविन्यासो महाकर्मा महाव्रती ।
कर्मभुक्कर्मफलदः कर्मेशः कर्मनिग्रहः ॥ ९४

नरो नारायणो दान्तः कपिलः कामदः शुचिः ।
तपा जपाऽक्षमालावान् गन्ता नेता लयो गतिः ॥ ९५

शिष्टो द्रष्टा रिपुद्वेष्टा रोष्टा वेष्टा महानटः ।
रोद्धा बोद्धा महायोद्धा श्रद्धावान् सत्यधीः शुभः ॥ ९६

मन्त्री मन्त्रो मन्त्रगम्यो मन्त्रकृत् परमन्त्रहृत् ।
मन्त्रभृन्मन्त्रफलदो मन्त्रेशो मन्त्रविग्रहः ॥ ९७

मन्त्राङ्गो मन्त्रविन्यासो महामन्त्रो महाक्रमः ।
स्थिरधीः स्थिरविज्ञानः स्थिरप्रज्ञः स्थिरासनः ॥ ९८

स्थिरयोगः स्थिराधारः स्थिरमार्गः स्थिरागमः ।
निःश्रेयसो निरीहोऽग्निर्निरवद्यो निरञ्जनः ॥ ९९

निर्वैरो निरहङ्कारो निर्दम्भो निरसूयकः ।
अनन्तोऽनन्तबाहूरुरनन्ताङ्घ्रिरनन्तदृक् ॥ १००

अनन्तवक्त्रोऽनन्ताङ्गोऽनन्तरूपो ह्यनन्तकृत् ।
ऊर्ध्वरेता ऊर्ध्वलिङ्गो ह्यूर्ध्वमूर्ध्वोर्ध्वशाखक ॥ १०१

ऊर्ध्व ऊर्ध्वाध्वरक्षी च ह्यूर्ध्वज्वालो निराकुल ।
बीजं बीजप्रदो नित्यं निदानं निष्कृति कृती ॥ १०२

महानणीयान् गरिमा सुषमा चित्रमालिक ।
नभस्स्पृङ् नभसो ज्योतिर्नभस्वान्निर्नभा नभ ॥ १०३

अभूर्विभु प्रभु शम्भुर्महीयान् भूर्भुवाकृति ।
महानन्दो महाशूरो ऽङ्गराशिर्महोत्सव ॥ १०४

महाक्रोधो महाज्वालो महाशान्तो महागुण ।
सत्यव्रत सत्यपर सत्यसन्ध सतां गति ॥ १०५

सत्येश सत्यसङ्कल्प सत्यचारित्रलक्षण ।
अन्तश्चरो ह्यन्तरात्मा परमात्मा चिदात्मक ॥ १०६

रोचनो रोचमानश्च साक्षी शौरिर्जनार्दन ।
मुकुन्दो नन्दनिष्पन्द स्वर्णबिन्दु पुरन्दर ॥ १०७

अरिन्दम सुमन्दश्च कुन्दमन्दारहासवान् ।
स्यन्दनारूढचण्डाङ्गो ह्यानन्दी नन्दनन्दन ॥ १०८

अनसूयानन्दनोऽत्रिनेत्रानन्द सुनन्दवान् ।
शङ्खवान्पङ्कजकर कुङ्कुमाङ्को जयाङ्कुश ॥ १०९

अम्भोजमकरन्दाढ्यो निष्पङ्कोऽगरुपङ्किल: ।
इन्द्रश्चन्द्ररथश्चन्द्रोऽतिचन्द्रश्चन्द्रभासक: ॥ ११०

उपेन्द्र इन्द्रराजश्च वागिन्द्रश्चन्द्रलोचन: ।
प्रत्यक् पराक् परं धाम परमार्थ: परात्पर: ॥ १११

अपारवाक् पारगामी पारावार: परावर: ।
सहस्वानर्थदाता च सहन: साहसी जयी ॥ ११२

तेजस्वी वायुविशिखी तपस्वी तापसोत्तम: ।
ऐश्वर्योद्भूतिकृद्भूतिरैश्वर्याङ्ग: कलापवान् ॥ ११३

अम्भोधिशायी भगवान् सर्वज्ञ: सामपारग: ।
महायोगी महाधीरो महाभोगी महाप्रभु: ॥ ११४

महावीरो महातुष्टिर्महापुष्टिर्महागुण: ।
महादेवो महाबाहुर्महाधर्मो महेश्वर: ॥ ११५

समीपगो दूरगामी स्वर्गमार्गनिरर्गल: ।
नगो नगधरो नागो नागेशो नागपालक: ॥ ११६

हिरण्मय: स्वर्णरेता हिरण्यार्चिर्हिरण्यद: ।
गुणगण्य: शरण्यश्च पुण्यकीर्ति: पुराणग: ॥ ११७

जन्यभृज्जन्यसन्नद्धो दिव्यपञ्चायुधो वशी ।
दौर्जन्यभङ्ग: पर्जन्य: सौजन्यनिलयोऽलय: ॥ ११८

जनन्मथान्तको भस्मदैन्यनाशी महामनाः ।
श्रेष्ठःश्रविष्ठो द्राघिष्ठो गरिष्ठो गरुडध्वजः ॥ ११९

ज्येष्ठो द्रढिष्ठो वर्षिष्ठो द्राघीयान् प्रणवः फणी ।
सम्प्रदायकरः स्वामी सुरेशो माधवो मधुः ॥ १२०

निर्निमेषो विधिर्वेधा बलवान् जीवनं बली ।
स्मर्ता श्रोता विकर्ता च ध्याता नेता समोऽसमः ॥ १२१

होता पोता महावक्ता रन्ता मन्ता खलान्तकः ।
दाता ग्राहयिता माता नियन्ताऽनन्तवैभवः ॥ १२२

गोप्ता गोपयिता हन्ता धर्मजागरिता धवः ।
कर्ता क्षेत्रकरः क्षेत्रप्रदः क्षेत्रज्ञ आत्मवित् ॥ १२३

क्षेत्री क्षेत्रहरः क्षेत्रप्रियः क्षेमकरो मरुत् ।
भक्तिप्रदो मुक्तिदायी शक्तिदो युक्तिदायकः ॥ १२४

शक्तियुङ्मौक्तिकस्रग्वी सूक्तिराम्नायसूक्तिगः ।
धनञ्जयो धनाध्यक्षो धनिको धनदाधिपः ॥ १२५

महाधनो महामानी दुर्योधनविमानितः ।
रत्नाकरो रत्नरोची रत्नगर्भाश्रयः शुचिः ॥ १२६

रत्नसानुनिधिर्मौलिरत्नभा रत्नकङ्कणः ।
अन्तर्लक्ष्योऽन्तरभ्यासी चान्तर्ध्येयो जितासनः ॥ १२७

अन्तरङ्गो दयावांश्च ह्यन्तर्यामी महार्णवः ।
सारसिद्धरसिकः सिद्धिसाध्यः सदागतिः ॥ १२८

आयुःप्रदो महापुण्यश्चिन्त्यमानोषधीपतिः ।
अष्टश्रीरष्टभागोऽष्टककुब्व्याप्तयशो व्रती ॥ १२९

अष्टापदः सुवर्णाभो ह्यष्टमूर्तिस्त्रिमूर्तिमान् ।
अस्वप्नः स्वप्नगः स्वप्नः सुस्वप्नफलदायकः ॥ १३०

दुःस्वप्नध्वंसको ध्वस्तदुर्निमित्तः शिवङ्करः ।
सुवर्णवर्णस्सम्भाव्यो वर्णितो वर्णसम्मुखः ॥ १३१

सुवर्णमुखरीतीरशिवध्यातपदाम्बुजः ।
दाक्षायणीवचस्तुष्टो दूर्वासोदृष्टिगोचरः ॥ १३२

अम्बरीषव्रतप्रीतो महाकृत्तिविभञ्जनः ।
महाभिचारकध्वंसी कालसर्पभयान्तकः ॥ १३३

सुदर्शनः कालमेघश्यामः श्रीमन्त्रभावितः ।
हेमाम्बुजसरस्स्नायी श्रीमनोभाविताकृतिः ॥ १३४

श्रीप्रदत्ताम्बुजस्रग्वी श्रीकेलिः श्रीनिधिर्भवः ।
श्रीप्रदो वामनो लक्ष्मीनायकश्च चतुर्भुजः ॥ १३५

सन्तृप्तस्तर्पितस्तीर्थस्नातृसौख्यप्रदर्शकः ।
अगस्त्यस्तुतिसंहृष्टो दर्शिताव्यक्तभावनः ॥ १३६

कपिलार्चि कपिलवान सुस्नानाघविशातन ।
वृषाकपि कपिस्वामिमनोऽन्तःस्थितविग्रह ॥ १३७

वह्निप्रियोऽर्थसंभाव्यो जनलोकविधायक ।
वह्निभो वह्नितेजा शुभाभीष्टप्रदो यमी ॥ १३८

वारुणक्षेत्रनिलयो वरुणो वारणार्चित: ।
वायुस्थानकृतावासो वायुगो वायुसंभृत । १३९

यमान्तकोऽभिजननो यमलोकनिवारण ।
यमिनामग्रगण्यश्च संयमी यमभावित ॥ १४०

इन्द्रोद्यानसमीपस्थ इन्द्रदृग्विषय प्रभु ।
यक्षराट् सरसीवासो ह्यक्षय्यनिधिकोशकृत ॥ १४१

स्वामितीर्थकृतावास स्वामिध्येयो ह्यधोक्षज ।
वराहाद्यष्टतीर्थाभिसेविताङ्घ्रिसरोरुह ॥ १४२

पाण्डुतीर्थाभिषिक्ताङ्गो युधिष्ठिरवरप्रद ।
भीमान्तःकरणारूढः श्वेतवाहनसख्यवान ॥ १४३

नकुलाभयदो माद्रीसहदेवाभिवन्दित: ।
कृष्णाशपथसन्धाता कुन्तीस्तुतिरतो दमी ॥ १४४

नारदादिमुनिस्तुत्यो नित्यकर्मपरायण ।
दर्शिताव्यक्तरूपश्च वीणानादप्रमोदित ॥ १४५

षट्कोटितीर्थचर्यावान् देवतीर्थकृताश्रम ।
विल्वामलजलस्नायी सरस्वत्यम्बुसेविनः ॥ १४६

तुम्बुरूदकसंस्पर्शजनचित्ततमोऽपहः ।
मत्स्यवामनकूर्मादितीर्थराज पुराणभृत् ॥ १४७

चक्रध्येयपदाम्भोज शङ्खपूजितपादुक ।
रामतीर्थविहारी च बलभद्रप्रतिष्ठितः ॥ १४८

जामदग्न्यसरस्तीर्थजलसेचनतर्पित ।
पापापहारिकीलालसुस्नाताघविनाशन ॥ १४९

नभोगङ्गाभिषिक्तश्च नागतीर्थाभिषेकवान् ।
कुमारधारातीर्थस्थो वटुवेषः सुमेखलः ॥ १५०

वृद्धस्य सुकुमारस्य सौन्दर्यवान् सुखा ।
प्रियंवदो महाकुक्षिरिक्ष्वाकुकुलनन्दन १५१

नीलगोक्षीरधाराभूर्वराहाचलनायक ।
भरद्वाजप्रतिष्ठावान् बृहस्पतिविभावित १५२

अञ्जनाकृतपूजावान् आञ्जनेयकरार्चित ।
अञ्जनाद्रिनिवासश्च मुञ्जकेशः पुरन्दर ॥ १५३

किन्नरद्वयसम्बन्धिबन्धमोक्षप्रदायकः ।
वैखानसमखारम्भो वृषज्ञेयो वृषाचलः ॥ १५४

वृषकायप्रभेत्ता च कण्डनाचारमभ्रम ।
सौवर्चलेयविन्यस्तराज्यो नारायण प्रिय ॥ १५५

दुर्मेधोभञ्जक. प्राज्ञ' ब्रह्मोत्सवमहोत्सुक ।
भद्रासुरशिरश्छेत्ता भद्रक्षेत्री सुभद्रवान ॥ १५६

मृगयाऽक्षीणसन्नाहः शङ्खराजन्यतुष्टिद ।
स्थाणुस्थो वैनतेयाङ्कः विनो दुर्गारवान ॥ १५७

सोगीन्द्रभोगसंस्थानं ब्रह्मादिगणसेवित ।
महमाकन्दघटाभास्वद्दिव्यानान स्थितो गुणी ॥ १५८

विश्वकर्मेनकृतश्नोत्र मनन्दनवर्गवृत ।
जाह्नव्यादिनदीसेव्य सुरेशाद्यभिवन्दित ॥ १५९

सुराङ्गनानृत्यपरो गन्धर्वोद्गायनप्रिय ।
राकेन्दुसङ्काशनख कोमलाङ्घ्रिसरोरुह ॥ १६०

कच्छपप्रपद कुन्दगुल्फक. स्वच्छकूर्पर ।
मेदुरस्वर्णवस्त्राढ्यकटिदेशस्थमेखल ॥ १६१

प्रोल्लसच्छुरिकाभास्वत्कटिदेश शुभङ्कर. ।
अनन्तपद्मजस्थाननाभिर्मौक्तिकमालिक ॥ १६२

मन्दारचाम्पेयमाली रत्नाभरणसंभृत ।
लम्बयज्ञोपवीती च चन्द्रश्रीखण्डलेपवान ॥ १६३

वरदोऽभयदश्चक्री शङ्खी कौस्तुभदीप्तिमान् ।
श्रीवत्साङ्कितवक्षस्को लक्ष्मीसंश्रितहृत्तटः ॥ १६४

नीलोत्पलनिभाकारः शोणाम्भोजसमाननः ।
कोटिमन्मथलावण्यश्चन्द्रिकास्मितपूरितः ॥ १६५

सुधास्वच्छोर्ध्वपुण्ड्रश्च कस्तूरीतिलकाञ्चितः ।
पुण्डरीकेक्षणः स्वच्छो मौलिशोभाविराजितः ॥ १६६

पद्मस्थः पद्मनाभश्च सोममण्डलगो बुधः ।
वह्निमण्डलगः सूर्यः सूर्यमण्डलसंस्थितः ॥ १६७

श्रीपतिर्भूमिजानिश्च विमलाद्यभिसंवृतः ।
जगत्कुटुम्बजनिता रक्षकः कामितप्रदः ॥ १६८

अवस्थात्रययन्ता च विश्वतेजःस्वरूपवान् ।
ज्ञप्तिर्ज्ञेयो ज्ञानगम्यो ज्ञानातीतः सुरातिगः ॥ १६९

ब्रह्माण्डान्तर्बहिर्व्याप्तो वेङ्कटाद्रिगदाधरः ।
वेङ्कटाद्रिगदाधर ॐ नम इति ।
एवं श्रीवेङ्कटेशस्य कीर्तनं परमाद्भुतम् ॥ १७०

नाम्नां सहस्रं संश्राव्यं पवित्रं पुण्यवर्धनम् ।
श्रवणात्सर्वदोषघ्नं रोगघ्नं मृत्युनाशनम् ॥ १७१

दारिद्र्यभेदनं धर्म्यं सर्वैश्वर्यफलप्रदम् ।
कालाहिविषविच्छेदिज्वरापस्मारभञ्जनम् ॥ १७२

शत्रुक्षयकरं राजग्रहपीडानिवारणम् ।
ब्रह्मराक्षसकूष्माण्डभेतालभयभञ्जनम् ॥ १७३

विद्याभिलाषी विद्यावान् धनार्थी धनवान् भवेत् ।
अनन्तकल्पजीवी स्यादायुष्कामो महायशाः ॥ १७४

पुत्रार्थी सुगुणान्पुत्रान् लभेताऽऽयुष्मतस्ततः ।
सङ्ग्रामे शत्रुविजयी सभायां प्रतिवादिजित् ॥ १७५

दिव्यैर्नामभिरेभिस्तु तुलसीपूजनात्सकृत् ।
वैकुण्ठवासी भगवत्सदृशो विष्णुसन्निधौ ॥ १७६

कह्लारपूजनात्साक्षात् द्वितीय इव यक्षराट् ।
नीलोत्पलार्चनात्सर्वराजपूज्यः सदा भवेत् ॥ १७७

हृत्स्थैर्नामभिरेभिस्तु भयाद्दृग्विषयो हरिः ।
वाञ्छितार्थं सदा दत्वा वैकुण्ठं च प्रयच्छति ॥ १७८

त्रिसन्ध्यं यो जपेन्नित्यं सम्पूज्य विधिना विभुम् ।
त्रिवारं पञ्चवारं वा प्रत्यहं क्रमशो यमी ॥ १७९

मासादलक्ष्मीनाशः स्यात् द्विमासात्स्यान्नरेन्द्रता ।
त्रिमासान्महदैश्वर्यं तत्र सम्भाषणं भवेत् ॥ १८०

मासं पठन्न्यूनकर्मसमूर्तिं च समवाप्नुयात् ।
मार्गभ्रष्टश्च सन्मार्गं गतस्वश्च स्वकीयकम् ॥ १८१

चाञ्चल्यचित्तोऽचाञ्चल्यं मनस्स्वास्थ्यं च गच्छति ।
आयुरारोग्यमैश्वर्यं ज्ञानं मोक्षं च विन्दति ॥ १८२

सर्वान्कामानवाप्नोति शाश्वतं च पदं तथा ।
सत्यं सत्यं पुनस्सत्यं सत्यं सत्यं न संशयः ॥ १८३

इति श्रीब्रह्माण्डपुराणे वसिष्ठनारदसंवादे श्रीवेङ्कटाचलमाहात्म्ये श्रीवेङ्कटेशसहस्रनामस्तोत्राध्यायः

समाप्तः ॥

श्रियःकान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥

श्रीवेङ्कटाचलाधीशं श्रियाऽध्यासितवक्षसम् ।
श्रितचेतनमन्दारं श्रीनिवासमहं भजे ॥

॥ श्रीवेङ्कटेशसहस्रनामावलि प्रारम्भः ॥

ओं श्रीवेङ्कटेशाय नमः
विरूपाक्षाय
विश्वेशाय
विश्वभावनाय
विश्वसृजे
विश्वसंहर्त्रे
विश्वप्राणाय
विराड्वपुषे
शेषाद्रिनिलयाय
अशेषभक्तदुःखप्रणाशनाय 10
शेषस्तुत्याय
शेषशायिने
विशेषज्ञाय
विभवे
स्वभुवे
विष्णवे
जिष्णवे
वर्धिष्णवे ,,
उत्सहिष्णवे
सहिष्णुकाय
भ्राजिष्णवे
ग्रसिष्णवे ,,
वर्तिष्णवे ,,

ओं भरिष्णुकाय नमः
कालयन्त्रे ,,
कालगोप्त्रे ,,
कालाय ,,
कालान्तकाय ,,
अखिलाय ,,
कालगम्याय ,, 30
कालकण्ठवन्द्याय
कालकालेश्वराय ,,
शम्भवे
स्वयम्भुवे ,,
अम्भोजनाभये
स्तम्भितवारिधये
अम्भोधिनन्दिनीजानये ,,
शोणाम्भोजपदप्रभाय
कम्बुग्रीवाय
शम्बरारिरूपाय ,, 40
शम्बरेक्षणाय
बिम्बाधराय ,,
बिम्बरूपिणे
प्रतिबिम्बक्रियातिगाय ,,
गुणवते ,,
गुणगम्याय ,,

ओं गुणातीताय नमः
गुणप्रियाय
दुर्गुणध्वंसकृते
सर्वसुगुणाय ,, ५०
गुणभासकाय ,,
परेशाय
परमात्मने
परस्मै ज्योतिषे ,,
परायै गतये ,,
परस्मै पदाय
वियद्वाससे ,,
पारम्पर्यशुभप्रदाय ,,
ब्रह्माण्डगर्भाय
ब्रह्मण्याय ६०
ब्रह्मसृजे
ब्रह्मबोधिताय ,,
ब्रह्मस्तुत्याय ,,
ब्रह्मवादिने ,,
ब्रह्मचर्यपरायणाय
सत्यव्रतार्थसन्तुष्टाय
सत्यरूपिणे
झषाङ्गवते
सोमकप्राणहारिणे
आनीताम्नायाय ,, ७०
अब्धिसञ्चाराय
देवासुरवरस्तुत्याय ,,
पतन्मन्दरधारकाय ,,
धन्वन्तरये ,,

ओं कच्छपाङ्गाय नमः
पयोनिधिविमन्थकाय ,,
अमरामृतसन्धात्रे ,,
धृतसम्मोहिनीवपुषे ,,
हरमोहकमायाविने
रक्षःसन्दोहभञ्जनाय ८०
हिरण्याक्षविदारिणे
यज्ञाय ,,
यज्ञविभावनाय
यज्ञीयोर्वीसमुद्धर्त्रे
लीलाक्रोडाय ,,
प्रतापवते
दण्डकासुरविध्वंसिने ,,
वक्रदंष्ट्राय
क्षमाधराय ,,
गन्धर्वशापहरणाय ,, ९०
पुण्यगन्धाय
विचक्षणाय
करालवक्त्राय ,,
सोमार्कनेत्राय
षड्गुणवैभवाय
श्वेतघोणिने ,,
घूर्णितभ्रुवे ,,
घर्घरध्वनिविभ्रमाय ,,
द्राघीयसे ,,
नीलकेशिने ,, १००
जाग्रदम्बुजलोचनाय ,,
घृणावते ,,

ओं घृणिसम्मोहाय नमः
महाकालाग्निदीधितये ,,
ज्वालाकरालवदनाय ,,
महोल्काकुलवीक्षणाय ,,
सटानिर्भिन्नमेघौघाय ,,
दंष्ट्रारुग्व्याप्तदिक्तटाय ,,
उच्छ्वासाकृष्टभूतेशाय ,,
निःश्वासत्यक्तविश्वसृजे ,, ११०
अन्तर्भ्रमज्जगद्गर्भाय ,,
अनन्ताय ,,
ब्रह्मकपालहृते ,,
उग्राय ,,
वीराय ,,
महाविष्णवे ,,
ज्वलनाय ,,
सर्वतोमुखाय
नृसिंहाय
भीषणाय ,, १२०
भद्राय ,,
मृत्युमृत्यवे
सनातनाय ,,
सभास्तम्भोद्भवाय ,,
भीमाय ,,
शिरोमालिने ,,
महेश्वराय ,,
द्वादशादित्यचूडालाय ,,
कल्पधूमसटाच्छवये ,,

ओं हिरण्यकोरःस्थलभिन्नखाय नमः
सिंहमुखाय नमः
अनघाय ,,
प्रह्लादवरदाय ,,
धीमते ,,
भक्तसंघप्रतिष्ठिताय ,,
ब्रह्मरुद्रादिसंसेव्याय ,,
सिद्धसाध्यप्रपूजिताय ,,
लक्ष्मीनृसिंहाय ,,
देवेशाय ,,
ज्वालाजिह्वान्त्रमालिकाय १४०
खड्गिने ,,
खेटिने ,,
महेष्वासिने ,,
कपालिने ,,
मुसलिने ,,
हलिने ,,
पाशिने ,,
शूलिने ,,
महाबाहवे ,,
ज्वरघ्नाय ,, १५०
रोगलुण्ठकाय ,,
मौञ्जीयुजे ,,
छात्रकाय ,,
दण्डिने ,,

ओं कृष्णाजिनधराय नमः
बटवे
अधीतवेदाय
वेदान्तोद्धारकाय
ब्रह्मनैष्ठिकाय
अहीनशयनप्रीताय १६०
आदितेयाय
अनघाय
हरये
संवित्प्रियाय
सामवेदाय
बलिवेश्मप्रतिष्ठिताय
बलिक्षालितपादाब्जाय
विन्ध्यावलिविमानिताय
त्रिपादभूमिस्वीकर्त्रे
विश्वरूपप्रदर्शकाय १७०
धृतत्रिविक्रमाय
स्वाङ्घ्रिनखभिन्नाण्डखर्पराय
पज्जातवाहिनीधारा-
पवित्रितजगत्त्रयाय
विधिसम्मानिताय
पुण्याय
दैत्ययोद्ध्रे
जयोर्जिताय
सुरराज्यप्रदाय
शुक्रमदहृते
सुगतीश्वराय १८०

ओं जामदग्न्याय नमः
कुठारिणे
कार्तवीर्यविदारणाय
रेणुकायाश्शिरोहारिणे
दुष्टक्षत्रियमर्दनाय
वर्चस्विने
दानशीलाय
धनुष्मते
ब्रह्मविद्वराय
अत्युदग्राय १९०
समग्राय
न्यग्रोधाय
दुष्टनिग्रहाय
रविवंशसमुद्भवाय
राघवाय
भरताग्रजाय
कौसल्यातनयाय
रामाय
विश्वामित्रप्रियङ्कराय
ताटकारये २००
सुबाहुघ्नाय
बलातिबलमन्त्रवते
अहल्याशापविच्छेदिने
प्रविष्टजनकालयाय
स्वयंवरसभासंस्थाय
ईशचापप्रभञ्जनाय
जानकीपरिणेत्रे
जनकाधीशसंस्तुताय

ओं अमर्त्यार्जितनूपुरयोङ्घ्रे नमः
अयोध्याधिपाग्र्याय ,, २१०
पितृवाक्यप्रतीपालाय ,,
त्यक्तराज्याय ,,
सलक्ष्मणाय ,,
ससीताय ,,
चित्रकूटस्थाय ,,
भरताहितराज्यकाय ,,
काकदर्पप्रहर्त्रे ,,
दण्डकारण्यवासकाय ,,
पञ्चवटीविहारिणे ,,
स्वधर्मपरिपोषकाय ,, २२०
विराधघ्ने ,,
अगस्त्यमुख्यमुनिसम्मानिताय
पुंसे ,,
इन्द्रचापधराय ,,
खड्गधराय ,,
अक्षयसायकाय ,,
खरान्तकाय ,,
दूषणारये ,,
त्रिशिरस्करिपवे ,,
वृषाय ,, २३०
शूर्पणखानासाच्छेत्त्रे ,,
वल्कलधारकाय ,,
जटावते ,,
पर्णशालास्थाय ,,
मारीचबलमर्दकाय ,,
पक्षिराट्कृतसंवादाय ,,

ओं रवितेजसे नमः
महाबलाय ,,
शबर्यानीतफलभुजे ,,
हनुमत्परितोषिताय ,, २४०
सुग्रीवाभयदाय ,,
दैत्यकायक्षेपणभासुराय ,,
सप्तसालसमुच्छेत्त्रे ,,
वालिहृते ,,
कपिसंवृताय ,,
वायुसूनुकृतासेवाय ,,
त्यक्तपम्पाय ,,
कुशासनाय ,,
उदन्वत्तीरगाय ,,
शूराय ,, २५०
विभीषणवरप्रदाय ,,
सेतुकृते ,,
दैत्यघ्ने ,,
प्राप्तलङ्काय ,,
अलङ्कारवते ,,
अतिकायशिरश्छेत्त्रे ,,
कुम्भकर्णविभेदनाय ,,
दशकण्ठशिरोध्वंसिने ,,
जाम्बवत्प्रमुखावृताय ,,
जानकीशाय ,, २६०
सुराध्यक्षाय ,,
साकेतेशाय ,,
पुरातनाय ,,
पुण्यश्लोकाय ,,

ओं देवदेवाय नमः
स्वामितीर्थनिवासकाय
लक्ष्मीसरःकेलिलोलाय
लक्ष्मीशाय
लोकरक्षकाय ,,
देवकीगर्भसम्भूताय २७०
यशोदेक्षणलालिताय
वसुदेवकृतस्तोत्राय
नन्दगोपमनोहराय
चतुर्भुजाय
कोमलाङ्गाय
गदावते
नीलकुन्तलाय
पूतनाप्राणसंहर्त्रे
तृणावर्तविनाशनाय
गर्गारोपितनामाङ्काय २८०
वासुदेवाय
अधोक्षजाय
गोपिकास्तन्यपायिने
बलभद्रानुजाय
अच्युताय
वैयाघ्रनखभूषाय
वत्सजिते
वत्सवर्धनाय
क्षीरसाराशनरताय
दधिभाण्डप्रमर्दनाय २९०
नवनीतापहर्त्रे
नीलनीरदभासुराय ,,

ओं आभीरदृष्टदौर्जन्याय नमः
नीलपद्मनिभाननाय ,
मातृदर्शितविश्वास्याय ,
उलूखलनिबन्धनाय ,,
नलकूबरशापान्ताय
गोधूलिच्छुरिताङ्गकाय ,
गोसङ्घरक्षकाय
श्रीशाय , ३००
बृन्दारण्यनिवासकाय
वत्सान्तकाय
बकद्विषे
दैत्याम्बुदमहानिलाय
महाजगरचण्डाग्नये ,
शकटप्राणकण्टकाय
इन्द्रसेव्याय
पुण्यगात्राय ,
खरजिते ,,
चण्डदीधितये , ३१०
तालपक्वफलाशिने
कालीयफणिदर्पघ्ने
नागपत्नीस्तुतिप्रीताय
प्रलम्बासुरखण्डनाय ,
दावाग्निबलसंहारिणे ,
फलहारिणे ,,
गदाग्रजाय ,
गोपाङ्गनाचेलचोराय ,
पाथोलीलाविशारदाय ,,
वंशगानप्रवीणाय ,, ३२०

ओं गोपीहस्ताम्बुजार्चिताय नमः
मुनिपत्न्याहृताहाराय ,,
मुनिश्रेष्ठाय ,,
मुनिप्रियाय ,,
गोवर्धनाद्रिसन्धर्त्रे ,,
संक्रन्दनतमोऽपहाय ,,
सदुद्यानविलासिने ,,
रासक्रीडापरायणाय ,,
वरुणाभ्यर्चिताय
गोपीप्रार्थिताय ,, ३३०
पुरुषोत्तमाय
अक्रूरस्तुतिसम्प्रीताय
कुब्जायौवनदायकाय
मुष्टिकोर. प्रहारिणे ,,
चाणूरोदरदारणाय ,,
मल्लयुद्धाग्रगण्याय ,,
पितृबन्धनमोचकाय ,,
मत्तमातङ्गपञ्चास्याय ,,
कंसग्रीवानिकृन्तनाय ,,
उग्रसेनप्रतिष्ठात्रे ३४०
रत्नसिंहासनस्थिताय
कालनेमिखलद्वेषिणे
मुचुकुन्दवरप्रदाय
साल्वसेवितदुर्धर्षराजस्मय-
निवारणाय ,,
रुक्मिगर्वापहारिणे
रुक्मिणीनयनोत्सवाय ,,
प्रद्युम्नजनकाय ,,

ओं कामिने नमः
प्रद्युम्नाय ,,
द्वारकाधिपाय ,, ३५०
मण्याहर्त्रे ,,
महामायाय ,,
जाम्बवत्कृतसङ्गराय ,,
जाम्बूनदाम्बरधराय ,,
गम्याय ,,
जाम्बवतीविभवे ,,
कालिन्दीप्रथितारामकेलये .
गुञ्जावतंसकाय ,,
मन्दारसुमनोभास्वते ,,
शचीशाभीष्टदायकाय ,, ३६०
सत्राजिन्मानसोल्लासिने ,,
सत्याजानये ,,
शुभावहाय ,,
शतधन्वहराय ,,
सिद्धाय ,,
पाण्डवप्रियकोत्सवाय ,,
भद्रप्रियाय ,,
सुभद्रायाभ्रात्रे ,,
नाग्नजितीविभवे ,,
किरीटकुण्डलधराय ,, ३७०
कल्पपल्लवलालिताय ,,
भैष्मीप्रणयभाषावते ,,
मित्रविन्दाधिपाय ,,
अभयाय ,,
स्वमूर्तिकेलिसम्प्रीताय ,,

ओं लक्ष्मणोदारमानसाय नमः
प्राग्ज्योतिषाधिपध्वंसिने ..
तत्सैन्यान्तकराय ..
अमृताय ..
भूमिस्तुताय .. ३८०
भूरिभोगाय ..
भूषणाम्बरसंयुताय ..
बहुरामाकृताह्लादाय ..
गन्धमाल्यानुलेपनाय ..
नारदादृष्टचरिताय ..
देवेशाय ..
विश्वराजे ..
गुरवे ..
बाणबाहुविदारकाय ..
तापज्वरविनाशकाय .. ३९०
उषोद्धर्षयित्रे ..
अव्यक्ताय ..
शिववाक्तुष्टमानसाय ..
महेशज्वरसंस्तुत्याय ..
शीतज्वरभयान्तकाय ..
नृगराजोद्धारकाय ..
पौण्ड्रकादिवधोद्यताय ..
विविधारिच्छलोद्विग्न-
ब्राह्मणेषु दयापराय ..
जरासन्धबलद्वेषिणे ..

ओं केशिदैत्यभयङ्कराय नमः ४००
चक्रिणे ..
चैद्यान्तकाय ..
सभ्याय ..
राजबन्धविमोचकाय ..
राजसूयहविर्भोक्त्रे ..
स्निग्धाङ्गाय ..
शुभलक्षणाय ..
धानाभक्षणसम्प्रीताय ..
कुचेलाभीष्टदायकाय ..
सत्त्वादिगुणगम्भीराय .. ४१०
द्रौपदीमानरक्षकाय ..
भीष्मध्येयाय ..
भक्तवश्याय ..
भीष्मपूज्याय ..
दयानिधये ..
दन्तवक्त्रशिरश्छेत्रे ..
कृष्णाय ..
कृष्णासखाय ..
स्वराजे ..
वैजयन्तीप्रमोदिने .. ४२०
बर्हिबर्हविभूषणाय ..
पार्थकौरवसन्धानकारिणे ..
दुःशासनान्तकारिणे ..
बुद्धाय ..
विशुद्धाय ..
सर्वज्ञाय ..

ओं क्रतुहिंसाविनिन्दकाय नमः
त्रिपुरस्त्रीमानभङ्गाय
सर्वशास्त्रविशारदाय
निर्विकाराय ,, ४३०
निर्ममाय ,,
निराभासाय
निरामयाय
जगन्मोहकधर्मिणे ,,
दिग्वस्त्राय ,,
दिक्पतीश्वराय ,,
कल्किने
म्लेच्छप्रहर्त्रे
दुष्टनिग्रहकारकाय
धर्मप्रतिष्ठाकारिणे ,, ४४०
चातुर्वर्ण्यविभागकृते ,,
युगान्तकाय
युगाक्रान्ताय ,,
युगकृते
युगभासकाय
कामारये ,,
कामकारिणे
निष्कामाय ,,
कामितार्थदाय ,,
सवितुर्वरेण्याय भर्गसे ,, ४५०
शार्ङ्गिणे ,,
वैकुण्ठमन्दिराय ,,
हयग्रीवाय ,,
कैटभारये ,,

ओं ग्राहघ्नाय नमः
गजरक्षकाय ,,
सर्वसंशयविच्छेत्रे ,,
सर्वभक्तसमुत्सुकाय ,,
कपर्दिने ,,
कामहारिणे ,, ४६०
कलायै ,,
काष्ठायै ,,
स्मृतये ,,
धृतये ,,
अनादये ,,
अप्रमेयौजसे ,,
प्रधानाय ,,
सन्निरूपकाय ,,
निर्लेपाय ,,
निस्पृहाय ,, ४७०
असङ्गाय ,,
निर्भयाय ,,
नीतिपारगाय ,,
निष्प्रेष्याय ,,
निष्क्रियाय
शान्ताय ,,
निष्प्रपञ्चाय ,,
निधये ,,
नयाय ,,
कर्मिणे ,, ४८०
अकर्मिणे ,,
विकर्मिणे ,,

ओं कर्मप्सवे	नमः		ओं महानटाय	नमः	
कर्मभावनाय	,,		रोद्धे	,,	
कर्माङ्गाय	,,		बोद्धे	,,	
कर्मविन्यासाय	,,		महायोद्धे	,,	
महाकर्मिणे			श्रद्धावते	,,	
महाव्रतिने			सत्यधिये	,,	
कर्मभुजे	,,		शुभाय	,,	
कर्मफलदाय	,,	४९०	मन्त्रिणे	,,	
कर्मेशाय			मन्त्राय	,,	
कर्मनिग्रहाय	,,		मन्त्रगम्याय	,,	५२०
नराय			मन्त्रकृते	,,	
नारायणाय			परमन्त्रहृते	,,	
दान्ताय			मन्त्रभृते	,,	
कपिलाय			मन्त्रफलदाय	,,	
कामदाय			मन्त्रेशाय		
शुचये	,,		मन्त्रविग्रहाय	,,	
तप्त्रे	,,		मन्त्राङ्गाय	,,	
जप्त्रे		५००	मन्त्रविन्यासाय	,,	
अक्षमालावते	,,		महामन्त्राय	,,	
गन्त्रे	,,		महाक्रमाय	,,	५३०
नेत्रे			स्थिरधिये	,,	
लयाय	,,		स्थिरविज्ञानाय	,,	
गतये	,,		स्थिरप्रज्ञानाय	,,	
शिष्टाय	,,		स्थिरासनाय	,,	
द्रष्ट्रे	,,		स्थिरयोगाय	,,	
रिपुद्वेष्ट्रे	,,		स्थिराधाराय	,,	
रोष्ट्रे	,,		स्थिरमार्गाय	,,	
वेष्ट्रे	,,	५१०	स्थिरागमाय	,,	

ओं निःश्रेयसाय	नमः	
निरीहाय	,,	५४०
अग्नये	,,	
निरवद्याय	,,	
निरञ्जनाय	,,	
निर्वैराय		
निर्वङ्गाय	,,	
निर्दम्भाय	,,	
निर्मूयकाय	,,	
अनन्ताय	,,	
अनन्तबाहवे	,,	
अनन्ताङ्घ्रये	,,	५५०
अनन्तदृशे	,,	
अनन्तवक्त्राय	,,	
अनन्ताङ्गाय	,,	
अनन्तरूपाय	,,	
अनन्तकृते	,,	
ऊर्ध्वरेतसे	,,	
ऊर्ध्वलिङ्गाय	,,	
ऊर्ध्वमूर्ध्ने	,,	
ऊर्ध्वशाखकाय	,	
ऊर्ध्वाय	,,	५६०
ऊर्ध्वाध्वरक्षिणे	,,	
ऊर्ध्वज्वालाय	,,	
निराकुलाय	,,	
बीजाय	,,	
बीजप्रदाय	,,	
नित्याय	,,	
ओं निदानाय	नमः	
निष्कृतये	,,	
कृतिने	,,	
महते	,,	५७०
अणीयसे	,,	
गरिम्णे	,,	
सुषमाय	,,	
चित्रमालिकाय	,,	
नभस्पृशे	,,	
नभसोज्योतिषे	,,	
नभस्वते	,,	
निर्नभसे	,,	
नभसे	.	
अभवे	,,	५८०
विभवे	,,	
प्रभवे	,,	
शम्भवे	,,	
महीयसे	,,	
भूर्भुवाकृतये	,,	
महानन्दाय	,,	
महाशूराय	,,	
महोराशये	,,	
महोत्सवाय	,,	
महाक्रोधाय	,,	५९०
महाज्वालाय	,,	
महाशान्ताय	,,	
महागुणाय	,,	
सत्यव्रताय	,,	

ओं सत्यपराय नमः
सत्यसन्धाय ..
सतांगतये
सत्येशाय ..
सत्यसङ्कल्पाय ..
सत्यचारित्रलक्षणाय .. ६००
अन्तश्चराय ..
अन्तरात्मने .
परमात्मने .
चिदात्मकाय .
रोचनाय ..
रोचमानाय ..
साक्षिणे .
शौरये .
जनार्दनाय ..
मुकुन्दाय ६१०
नन्दनिष्पन्दाय ..
स्वर्णबिन्दवे ..
पुरन्दराय
अरिन्दमाय
सुमन्दाय .
कुन्दमन्दारहासवते
स्यन्दनारूढचण्डाङ्गाय
आनन्दिने
नन्दनन्दनाय
अनसूयानन्दनाय . ६२०
अत्रिनेत्रानन्दनाय .
सुनन्दवते ..

ओं शङ्खवते नमः
पङ्कजकराय ..
कुङ्कुमाङ्काय ..
जयाङ्कुशाय ..
अम्भोजमकरन्दाढ्याय .
निष्पङ्काय ..
अगरुपङ्किलाय .
इन्द्राय . ६३०
चन्द्ररथाय
चन्द्राय ..
अतिचन्द्राय ..
चन्द्रभासकाय
उपेन्द्राय
इन्द्रराजाय
वागिन्द्राय
चन्द्रलोचनाय
प्रत्यञ्चे .
पराञ्चे ६४०
परन्धाम्ने .
परमार्थाय .
परात्पराय
अपारवाचे ..
पारगामिने .
परावाराय ..
परावराय
सहस्वते .
अर्थदात्रे .
महनाय .. ६५०

ओं सात्त्विने	नमः	ओं नगाय	नमः	
जयिने	.	नगधराय	,,	६८०
तेजस्विने		नागाय	,,	
वायुर्वीर्जस्विने		नागेशाय	,,	
तपस्विने		नागपालकाय	.	
तापसोत्तमाय		हिरण्मयाय	,,	
ऐश्वर्योद्भूतिकृते	,	स्वर्णरेतसे	,,	
भूतये		हिरण्यार्चिषे	,,	
ऐश्वर्याङ्गकलापवते		हिरण्यदाय	,,	
अम्भोधिशायिने	६६०	गुणगण्याय	,	
भगवते		शरण्याय	,	
सर्वज्ञाय	.	पुण्यकीर्तये	,,	६९०
सामपारगाय		पुराणगाय		
महायोगिने		जन्यभृते	,,	
महाधीराय		जन्यसन्नद्धाय		
महाभोगिने		दिव्यपञ्चायुधाय	,	
महाप्रभवे		वशिने	,,	
महावीराय		दौर्जन्यभङ्गाय	,,	
महातुष्टये		पर्जन्याय	.	
महापुष्टये	६७०	सौजन्यनिलयाय	,,	
महागुणाय		अलयाय	.	
महादेवाय	,	जलन्धरान्तकाय	,,	७००
महाबाहवे	.	भस्मदैत्यनाशिने		
महाधर्माय	.	महामनसे	,,	
महेश्वराय	.	श्रेष्ठाय	,,	
समीपगाय		श्रविष्ठाय	,,	
दूरगामिने		द्राघिष्ठाय	,	
स्वर्गमार्गनिरर्गलाय	.	गरिष्ठाय	,,	

ओं गरुडध्वजाय	नमः		ओं रन्त्रे	नमः	
ज्येष्ठाय	,,		मन्त्रे	,,	
श्रेष्ठाय	,,		खलान्तकाय	,,	
वरिष्ठाय	,,	७१०	दात्रे	,,	
द्राघीयसे	,,		ग्राहयित्रे	,,	
प्रणवाय	,,		मात्रे	,,	७४०
फणिने	,,		नियन्त्रे	,,	
सम्प्रदायकराय	,,		अनन्तवैभवाय	,,	
स्वामिने	,,		गोप्त्रे	,,	
सुरेशाय	,,		गोपयित्रे	,,	
माधवाय	,,		हन्त्रे	,,	
मधवे	,,		धर्मजागरित्रे	,,	
निर्निमेषाय	,,		धवाय	,,	
विष्णवे	,,	७२०	कर्त्रे	,,	
वेधसे	,,		क्षेत्रकराय	,,	
बलवते	,,		क्षेत्रप्रदाय	,,	७५०
जीवनाय	,,		क्षेत्रज्ञाय	,,	
बलिने	,,		आत्मविदे	,,	
स्मर्त्रे	,,		क्षेत्रिणे	,,	
श्रोत्रे	,,		क्षेत्रहराय	,,	
विकर्त्रे	,,		क्षेत्रप्रियाय	,,	
ध्यात्रे	,,		क्षेमकराय	,,	
नेत्रे	,,		मरुते	,,	
समाय	,,	७३०	भक्तिप्रदाय	,,	
असमाय	,,		मुक्तिदाय	,,	
होत्रे	,,		शक्तिदाय	,,	७६०
पोत्रे	,,		युक्तिदायकाय	,,	
महावक्त्रे	,,		शक्तियुजे	,,	

ओं मौक्तिकमणिवर्णे नमः
सूक्तये
आम्नायमूक्तिकगाय
धनञ्जयाय
धनाध्यक्षाय
धनिकाय
धनदाधिपाय
महाधनाय ३७०
महामानिने
दुर्योधनावमानिताय
रत्नाकराय
रत्नरोचिषे
रत्नगर्भाश्रयाय
शुचये
रत्नसानुनिधये
मौलिरत्नभासे
रत्नकङ्कणाय
अन्तर्लक्ष्याय ३८०
अन्तरभ्यासिने
अन्तर्ध्येयाय
जितासनाय
अन्तरङ्गाय
दयावते
अन्तर्मायाय
महार्णवाय
सरसाय
सिद्धरसिकाय
सिद्धये ३९०

ओं माध्याय नमः
सदागतये
आयुःप्रदाय
महायुष्मते
अर्चिष्मते
ओषधीपतये
अष्टश्रिये
अष्टभागाय
अष्टककुब्व्याप्तयशसे
व्रतिने ४००
अष्टापदाय
सुवर्णाभाय
अष्टमूर्तये
त्रिमूर्तिमते
अस्वप्नाय
स्वप्नगाय
स्वप्नाय
सुस्वप्नफलदायकाय
दुस्स्वप्नध्वंसकाय
ध्वस्तदुर्निमित्ताय ४१०
शिवङ्कराय
सुवर्णवर्णाय
सम्भाव्याय
वर्णिताय
वर्णसम्मुखाय
सुवर्णमुखरीतीरशिवध्यात-
पदाम्बुजाय
दाक्षायणीवचस्तुष्टाय

ओं दूर्वासोदृष्टिगोचराय नमः

अम्बरीषव्रतप्रीताय
महाकृतिविभञ्जनाय ८२०
महाभिचारकध्वंसिने
कालसर्पभयान्तकाय
सुदर्शनाय
कालमेघश्यामलाय
श्रीमन्त्रभाविताय
हेमाम्बुजसरस्स्नायिने
श्रीमनोभाविताकृतये
श्रीप्रदत्ताम्बुजस्रग्विणे
श्रीकेलये
श्रीनिधये ८३०
भवाय
श्रीप्रदाय
वामनाय
लक्ष्मीनायकाय
चतुर्भुजाय
संतृप्ताय
तर्पिताय
तीर्थस्नातृसौख्यप्रदर्शकाय

अगस्त्यमुनिसंहृष्टाय

दर्शिताव्यक्तभावनाय ८४०
कपिलार्चिषे
कपिलवते

ओं सुस्नातार्घविपाटनाय नमः
वृषाकपये
कपिस्वामिमनोन्तःस्थित-
विग्रहाय
वह्निप्रियाय
अर्थसंभाव्याय
जनलोकविधायकाय
वह्निप्रभाय
वह्नितेजसे ८५०
शुभाभीष्टप्रदाय
यमिने
वारुणक्षेत्रनिलयाय
वरुणाय
वारणार्चिताय
वायुस्थानकृतावासाय
वायुगाय
वायुसम्भृताय
यमान्तकाय
अभिजननाय ८६०
यमलोकनिवारणाय
यमिनामग्रगण्याय
संयमिने
यमभाविताय
इन्द्रोद्यानसमीपस्थाय
इन्द्रदृग्विषयाय
प्रभवे
यक्षराट्सरसीवासाय
अक्षय्यनिधिकोशकृते

ओं स्वामितीर्थकृतावासाय नमः ८७०
स्वामिध्येयाय ..
अधोक्षजाय ..
वराहाद्यष्टतीर्थाभि-
सेवितांघ्रिसरोरुहाय ..
पाण्डुतीर्थाभिषिक्ताङ्गाय
युधिष्ठिरवरप्रदाय ..
भीमान्तःकरणारूढाय .
श्वेतवाहनसख्यवते .
नकुलाभयदाय ..
माद्रीसहदेवाभिवन्दिताय ..
कृष्णाशपथसन्धात्रे .. ८८०
कुन्तीस्तुतिरताय .
दमिने .
नारदादिमुनिस्तुत्याय .
नित्यकर्मपरायणाय ..
दर्शिताव्यक्तरूपाय .
वीणानादप्रमोदिताय .
षट्कोटितीर्थचर्यावते
देवतीर्थकृताश्रमाय
बिल्वामलजलस्नायिने .
सरस्वत्यम्बुसेविताय . ८९०
तुम्बुरूदकसंस्पर्श-
जनचित्ततमोऽपहाय .
मत्स्यवामनकूर्मादि-
तीर्थराजाय ..

ओं पुराणभृते नमः
चक्रध्येयपदाम्बुजाय ..
शङ्खपूजितपादुकाय ..
रामतीर्थविहारिणे ..
बलभद्रप्रतिष्ठिताय ..
जामदग्न्यसरस्तीर्थ-
जलसेचनतर्पिताय ..
पापापहारिकीलाल-
सुस्नाताघविनाशनाय ..
नभोगङ्गाभिषिक्ताय .. ९००
नागतीर्थाभिषेकवते ..
कुमारधारातीर्थस्थाय ..
वटुवेषाय ..
सुमेखलाय ..
वृद्धस्य सुकुमारत्वप्रदाय
सौन्दर्यवते .
सुखिने ..
प्रियंवदाय ..
महाकुक्षये ..
इक्ष्वाकुकुलनन्दनाय .. ९१०
नीलगोक्षीरधाराभुवे ..
वराहाचलनायकाय ..
भरद्वाजप्रतिष्ठावते ..
बृहस्पतिविभाविताय ..
अञ्जनाकृतपूजावते ..
आञ्जनेयकरार्चिताय ..

ओं अञ्जनाद्रिनिवासाय नमः
मुञ्जकेशाय
पुरन्दराय
किन्नरद्वयसम्बन्धिबन्ध-
मोक्षप्रदायकाय १२०
वैखानसमखारम्भाय
वृषज्ञेयाय
वृषाचलाय
वृषकायप्रभेत्त्रे
क्रीडनाचारसम्भ्रमाय
सौवर्चलेयविन्यस्तराज्याय
नारायणप्रियाय
दुर्मेधोभञ्जकाय
प्राज्ञाय
ब्रह्मोत्सवमहोत्सुकाय १३०
भद्रासुरशिरश्छेत्त्रे
भद्रक्षेत्रिणे
सुभद्रवते
मृगयाक्षीणसन्नाहाय
शङ्खराजन्यतुष्टिदाय
स्थाणुस्थाय
वैनतेयाङ्कभाविताय
अशरीरवते
भोगीन्द्रभोगसंस्थानाय
ब्रह्मादिगणसेविताय १४०

ओं सहस्रार्कच्छटाभास्वद्-
विमानान्तःस्थिताय नमः
गुणिने
विष्वक्सेनकृतस्तोत्राय
सनन्दनवरीवृताय
जाह्नव्यादिनदीसेव्याय
सुरेशाद्यभिवन्दिताय
सुराङ्गनानृत्यपराय
गन्धर्वोद्गायनप्रियाय
राकेन्दुसङ्काशनखाय
कोमलाङ्घ्रिसरोरुहाय १५०
कच्छपप्रपदाय
कुन्दगुल्फकाय
स्वच्छोरुपराय
मेदुरस्वर्णवस्त्राढ्य-
कटिदेशस्थमेखलाय
प्रोल्लसच्छुरिकाभास्वत्-
कटिदेशाय
शुभङ्कराय
अनन्तपद्मजस्थाननाभये
मौक्तिकमालिकाय
मन्दारचाम्पेयमालिने
रत्नाभरणसम्भृताय १६०
लम्बयज्ञोपवीतिने

ॐ चन्द्रश्रीमण्डलेपवते नम
वरदाय
अभयदाय
चक्रिणे
शार्ङ्गिणे
कौस्तुभशोभितान्तराय
श्रीवत्साङ्कितवक्षस्काय
लक्ष्मीसंश्रितहृत्तटाय
नीलोत्पलनिभाकाराय १७०
शोणाम्भोजसमाननाय
कोटिमन्मथलावण्याय
चन्द्रिकास्मितपूरिताय
सुधासक्तादिवृक्षाय
कस्तूरीतिलकाञ्चिताय
पुण्डरीकेक्षणाय
स्वच्छाय
मौलिशोभाविराजिताय
पद्मस्थाय
पद्मनाभाय १८०
सोममण्डलगाय

ॐ बुधाय नमः
वह्निमण्डलगाय
सूर्याय
सूर्यमण्डलसंस्थिताय
श्रीपतये
भूमिजानये
विमलाद्यभिसंवृताय
जगत्कुटुम्बजनित्रे
रक्षकाय १९०
कामितप्रदाय
अवस्थात्रययन्त्रे
विश्वतैजसरूपवते
ज्ञानये
ज्ञेयाय
ज्ञानगम्याय
ज्ञानातीताय
सुरातिगाय
ब्रह्माण्डान्तर्बहिर्व्याप्ताय
वेङ्कटाद्रिगदाधराय

इति श्रीब्रह्माण्डपुराणान्तर्गत श्रीवेङ्कटेश
सहस्रनामावलिस्समाप्ता ।

ॐ तत्सत्